No. ५६२९ घ

Title श्रीत्रिपुरसुन्दरी पटलः

Author

Extent ६१

Subject तन्त्रम् सम्पूर्णम्

श्रीविद्यापद्धतिः पद्मनाभ्वराणा. बहुणी. शिवकावं.

११८

११५

नं० ५६२६-घ

त्रिपुरासुंदरीपटलः

पत्राणि ६+२+५३=६१

नं० ~~११६३~~

नं० ५६२९-घ

श्रीत्रिपुरसुन्दरी पटल: = पत्राणि ६ (षट्)
श्रीविद्यानित्यपूजापद्धति: पत्रे २ (द्वावेपि)
पंचमीस्तवराज: (तन्त्रम्)
बटुकभैरवस्तोत्रम्
शिवकवचम्
सर्वाणि पत्राणि=५३ (सम्पूर्णम्) = ६१ पत्राणि

5629
53

ले०

श्री· ॐश्रीदेवीजयतुसदा श्रीदेव्युवाच भगवन्सर्ववेत्तात्वंजगतामुपकारकः देवादिदेवदेवेशत्रैलो
१ क्याभयदायक शाक्तशास्त्रसंग्रामेममस्कंदन्नोवरस्त्वयातदद्यकृपयाशंभोसंप्रदातुंक्षमोभव ॥
श्रीभैरवउवाच देविसत्यंवरोदत्तोदेवदानवसंगरे यत्नेमनस्यभीष्टंतत्तत्त्वंवदस्वसुव्रते श्रीदेव्यु
वाच भगवन्सर्वधर्मज्ञसकलागमपारग देवदेवीमहादेवीमहात्रिपुरसुंदरी त्रिकूटाषोडशी
देवीश्रीविद्याब्रह्मरूपिणी तस्याःपंचांगमखिलंसारात्सारोत्तमोत्तमं वदशीघ्रंमहादेवयद्यहंप्रेय
सीतव श्रीईश्वरउवाच लक्षवारसहस्राणिवारितासिपुनःपुनः देवदेविमहादेविपुनस्त्वंपरिपृ
च्छसि अद्याहंकृपयादेवितवप्रीत्यामहेश्वरि महात्रिपुरसुंदर्याःपंचांगंतद्ब्रवीम्यहं श्रीविद्यात्रिपु
रादेवीजगद्ब्रह्मस्वरूपिणी त्रिकूटाषोडशीविद्यामहाश्रीषोडशाक्षरी यादेवदेवीजगतांसृष्टि
स्थितिलयात्मिकासामहाषोडशीविद्यामहात्रिपुरसुंदरीराज्यंदेयंशिरोदेयंदेयासंपत्सदार्थिने
वस्त्रस्वर्णंगृहंदेयंनदेयाषोडशाक्षरी गोप्यगोप्यतमांविद्यांगुप्तांचशरजन्मनः गुह्यातिगोप्य
गोप्तव्यंसाधकाग्रेनगोपयेत् त्रिपुरेशीमहाविद्याप्रभावमहिताकलौ अवस्थारूपिणीविद्या
बालायुवतिप्रौढिका अक्षरीत्रिपुराबालाप्रौढापंचदशाक्षरी देवीत्रिकूटाश्रीविद्यामहाश्रीषोड
शाक्षरी महाश्रीषोडशाक्षर्याःमंत्रोद्धारंब्रवीम्यहं शिवःशक्तिःकामक्षितीमायाहंसःस्वधातनुः।
कामोहंसःशक्रलज्जेतदग्रचन्द्रमास्मरः इंद्रोधरेन्द्रजासैषापूर्णापंचदशीरिता गुरुप्रसादसं।

लभ्याश्रीविद्याषोडशाक्षरी अस्यश्रीषोडशाक्षर्याः अन्यदोषोनविद्यते मंत्रोत्कीलनदोषोवामंत्र
मंजीवनस्यच मंपुटस्यविनादेविपुरश्चरणकर्मणा गुरुहस्तेनवादेविसाधकस्यकरेणवापु
रश्चर्यांप्रकुर्वीतवर्णलक्षंजपावधिं नकदाचित्प्रकुर्वीतस्वहस्तेनचसाधकः नतिथिर्नच
नक्षत्रंनोगणन्यासश्चमंत्रिणां नवारदोषोनोविघ्नोनशौचंनियमोनच साक्षादमृतरूपोयंमं
त्रःश्रीषोडशाक्षरः ऋषिःस्याद्दक्षिणामूर्तिःपंक्तिःछंदउदाहृतं देवताचमयाप्रोक्तामहा
त्रिपुरसुंदरी लक्ष्मीबीजंपराशक्तिःकामराजस्तुकीलकं चतुर्वर्गेतुविद्यायांविनियोगः
प्रकीर्तितः यंत्रोद्धारंप्रवक्ष्यामिसर्वाशापरिपूरकं सर्वसंमोहनंयंत्रंसर्वसिद्धिप्रदायकं अथ
यंत्रोद्धारः बिंदुत्रिकोणवसुकोणदशारयुग्ममन्वश्रनागदलसंगतषोडशारं वृत्तत्रयंच
धरणीसदनत्रयंचश्रीचक्रराजउदितःपरदेवतायाः अथध्यानं प्रवक्ष्यामिसर्वतंत्रेषुगोपितं
सारंत्रिपुरसुंदर्याःसर्वस्वंममपार्वति येनध्यानेनब्रह्मांडकटाहांतंविलीयते ॐअरुणमहे
महश्चिरांरविचंद्रवह्निःनेत्रांधनुःशरयुतांकुशपाशहस्तां रम्यैःभुजैश्चदधतींशिवश
क्तिरूपांकामेश्वरींहृदिभजामिधृतेंदुलेखां इतिध्यानं अनेनध्यानमात्रेणब्रह्माविष्णुह
रःशिवे ब्रह्मादयःसुरगणा जातानिस्पंदचक्षुषः अत्रादौदेविवक्ष्यामिपूजापटलमी
श्वरि श्रीदेव्याःषोडशाक्षर्याःपूजांमानसिकींचरेत् स्थानकेमृजकेवापिपथिकांतारमंड

लेमनसैवचोरस्त्रजं त्रिकूटायाः महेश्वरि शृणुत्वं भक्तिभावेन यथावदर्प्यते मया अथाय
शयनाद्देवि ब्राह्मे दिव्ये मुहूर्त्तके प्रक्षाल्य मुखहस्तांघ्रीनाचम्य त्रिः महेश्वरि प्राणायामत्रयं
कृत्वा गुरुं ध्यात्वा सशक्तिकं देवीं कामेश्वरांकोपविष्टां कामेश्वरीं स्मरेत् ध्यात्वा पूर्वेण षड्
दीर्घैः न्यासं कृत्वा यथाविधि जपेन्मूलं च गायत्रीं गुरवे च समर्पयेत् आगत्य बहिरोंकारं
जपन्नारण्यभूमिषु तत्र मूत्रादि संत्यज्य वर्णोंकां शौचमाचरेत् रमाबीजेन संशोध्य दंता
न्साधकसत्तमः मायाबीजेन गंडूषत्रयं कुर्यान्महेश्वरि मूलेन देवि तीर्थानि तदावाहय स्व
सिद्धये ॐ गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिंधुकावेरि जलेस्मिन्सन्निधिं कुरु
इत्यावाह्य महादेवि देवीमावाहयेत्ततः मूलेन त्रिः समुत्सृज्य न यं भसि महेश्वरि ततो
मूलं जपेन्मंत्री गायत्रीं च विशेषतः सूर्यायार्घ्यत्रयं दद्याद्देवदेव्यात्मकैश्च वच ॐ त्रिपुरे दे
वि विद्महे क्ल्यादिकूटसमन्विते कामेश्वरि धीमहि च द्वितीयकूटभूषिते तृतीयकूटपूर्वे
च ततः क्लिन्ना प्रचोदयात् ३ जलादाकृष्य वासांसि परिधाय च साधकः संध्यां समन
साकृत्वा चाघमर्षणपूर्वकं संध्यां निर्वर्त्य देवेशि यागगेहं ततो व्रजेत् ततः द्वारार्चनं कृ
त्वा कुर्यादासनशोधनं भूतशुद्धिं ततः कुर्यात्प्राणार्पणविधिं ततः षोडशान्यासभागेन
देहं देवमयं चरेत् मनसा वर्णभागोक्तं श्रीचक्रं तत्र भावयेत् विभाव्य तत्र श्रीचक्रं हृद

येमायकोऽनमः योगपीठंततोभ्यर्च्यहृत्तेयंरंलंवंइति विंदौकामेश्वरांकोपविष्टांकामेश्वरींस्मरेत्त
पात्राणिस्थापयेत्तत्रत्रिकोणेजलनिर्मिते चतुरस्रंमंडलेचविधायगंधकांडुभिः सामान्यार्घ्यंत्रि
कूटायामंडलंपूजयेच्छिवे चतुरश्रेमंडलेचसमभ्यर्च्यचरेत्ततः ॐअस्त्रायफडितिसंवेसंस्थाप्या
त्रत्रिपादिकां तत्रात्रप्रक्षालितंशंखंसमभ्यर्च्यतथासुधीः तत्रार्कमंडलंदेविसोमवह्न्योश्चमंड
ले संपूज्यमूलमंत्रेणकलास्तेषांसमर्चयेत् मूलाष्टमंत्रितंदेविविधायतीर्थवारिच तेना
र्घ्यंशिवेशंखंविशांवमुद्रांनिवेश्यच तीर्थमावाह्यदेवेशिशुद्धंतत्रैवभावयेत् सामान्यार्घ्यं
स्यवामेतुशोधितंकलशंशिवे अग्रेचैववषट्श्रेचहृत्तंत्र्यश्रमंडले शुध्यात्तैःसमभ्यर्च्य
तत्रकूटत्रयेणच षडंगन्यासभागेनसमभ्यर्च्यषडश्रकम् चतुरश्रेतथाभ्यर्च्यसंस्थाप्यात्र
त्रिपादिकां कलाःसूर्येंदुवह्नीनांसमभ्यर्च्ययथाविधि कलशेऽस्मिन्महादेविदेवींसंपूजयेत्परा
मानंदभैरवंचैवदेविकूटत्रयेणच मायारमाकामबीजैःधेनुमुद्रांप्रदर्शयेत् मत्स्यमुद्रादि
नाच्छाद्यसामान्यार्घ्यस्यदक्षिणे कलशार्द्धेमंडलेचविधायात्रमहेश्वरि शक्तिपात्रंसमादा
य मूलेनाष्टाभिमंत्रितं तत्रैवप्रोक्षणीपात्रंतथावटुकपात्रकं गुरुपात्रादिशुद्धेप्यंतीर्थशंखा
दयोयथः पंक्त्याकारेणदेवेशिपात्राणिस्थापयेत्ततः पाद्यार्घ्यमधुपर्काचमनीयपात्रपूज
ने विधायतत्रश्रीदेव्यान्यासंषडंगपूर्वकं मणिपूरेब्रलरंध्रेमूलाधारादिकेशिवे शिवश

श्री· ३

क्त्योः सामरस्यं विभाव्य साधकेश्वरः ततः कामकलारूपत्रिपुरीकृतविग्रहः शिवशक्त्योः
पादुकां च तर्पयामि नम इति सम्यग्यादेवि संतर्प्य ततः कूटत्रयेण च सर्वं ततः स्वच्छन्नायाः
पूजनीयाश्च तर्पणैः संतर्पयेद्गुरुं तत्रादिव्यौघादीन्महेश्वरि पराः शक्तियुताः पूज्याः तीर्था
वंतां महेश्वरि तत्त्रयेणाचम्य शिव एव भवेत्स्वयं श्रीचक्रे देवदेव्योश्च रूपं ध्यात्वा त्रिव
र्णकं स्थापनं सन्निधानं च संमुखीकरणं शिवे मुद्राभिः साधकः कृत्वा देवीं स्वहृद्यमु
द्रया देवं देवाग्रमूलेन प्राणान्दत्त्वा महेश्वरि शिवशक्त्योः परं रूपं ध्यात्वा पूजां समाचरेत्
तत्रादौ देवदेव्योश्च पाद्यार्घ्यादीन्निवेदयेत् मधुपर्कं निवेद्यापि नैवेद्याचमनीयकं नाना
लंकारवस्त्राणि निवेद्य साधकोत्तमः नैवेद्याचमनीयाद्यं शिवशक्त्योः निवेदयेत् दीपधू
पादिसंभाव्य परमान्नं निवेद्य च तांबूलं च समुद्दिश्य दत्त्वा स्वच्छन्नायाश्च तर्पयेत् पुष्पांजलिं च
श्रीचक्रे दत्त्वा पूजां समारभेत् आदौ कामेश्वरीं नित्यां पूजयेद्भगमालिनीम् नित्यक्लिन्नां
च संपूज्य भेरुण्डां च महेश्वरि श्रीवह्निवासिनीं नित्यां महाविद्येश्वरीं ततः शिवदूतीं महे
शानि त्वरितां पूजयेत्ततः श्रीकुलसुंदरीं नित्यां नित्यां नित्यां ततः परं ततो नीलपताकां च
विजयां च महेश्वरि श्रीसर्वमंगलां नित्यां ज्वालामालां ततः परं चित्रां नित्यां महेशानि त्रि
कूटां पूजयेच्छिवे पुनः पुष्पांजलिं दत्त्वा श्रीविद्याष्टभागके गुरुपंक्तित्रयीं पूज्यानर्प।

णीयाः पृथक्पृथक् गुरुपूजां विधायाथ त्रिपुरां पूजयेत्ततः त्रिपुरां पूजयाम्यद्य तर्पयामि न
मः इति तत्रादौ पूजयेद्देवीं ऐं क्लीं सौः त्रिपुरेश्वरी त्रिपुरसुन्दरी देवि ततः त्रिपुरवासिनीम् त्रि
पुरां पूजयेत् मंत्री ऐं क्लीं त्रिपुरमालिनी ह्रीं श्रीं सौः त्रिपुरां सिद्धां पूजयेत् त्रिपुरांबिकां पूजये
न्मो त्रिकोणे ऐं त्रैः महात्रिपुरसुन्दरी इति श्रीचतुरश्रादिबिन्द्वांतेषु पूजयेत् नवचक्रेषु देवा।
शि नवचक्रेश्वरीस्ततः पूजनीयाश्च योगिन्यो वामावर्तेन पार्वति अणिमाद्यास्तथा सिद्धीः
पूजयेत्साधको नमः आत्माद्या मातरः पूज्या रेखासु परमेश्वरि सर्वसंक्षोभिणीत्याद्यान
वमुद्राः प्रपूजयेत् ततो मूलेन श्रीविद्यां संतर्प्य परमेश्वरी पुष्पांजलिं च श्रीचक्रे दत्वा
स पृष्ठदले चर्चयेत् सर्वाशापूरकायात्र श्रीचक्राय महेश्वरि दद्यात्पुष्पांजलिं दिव्यं ततः संपू
जयेच्छिवो ह्रीं श्रीं कामाकर्षिणी च नित्या कलां पदां चितां अं आं बुद्ध्याकर्षिणी च तथा हंका
रकर्षिणी इं ईं शब्दाकर्षिणी च तथा उं स्पर्शाकर्षिणी ऊं रूपाकर्षिणी नित्यां ऋं रसाकर्षि
णी तथा ॠं गंधाकर्षिणी नित्यां लृं चित्ताकर्षिणी तथा लॄं धैर्याकर्षिणी नित्यां एं स्मृत्या
कर्षिणी तथा ऐं नामाकर्षिणी नित्यां ओं बीजाकर्षिणी तथा औं आत्माकर्षिणी नित्याममृ
ताकर्षिणी तथा अः शरीराकर्षिणी च षोडशारेषु पूजयेत् मूलदेवीं महादेवि संतर्प्य साध
को नमः सर्वसंक्षोभके चक्रे दत्वा पुष्पांजलिं ततः अनंगकुसुमां देवीमनंगमेखलेति च

श्री·
५

अनंगमदनांदेवीमनंगमदनातुरां संपूज्यानंगरेखांच संपूज्यानंगवेगिनी अनंगांकु
शांसंपूज्यसंपूज्यानंगमालिनीं संपूज्याष्टदलेदेवि मूलदेवींचतर्पयेत् शिवशक्त्योःसा
धकेशः प्रणमेद्योनिमुद्रया इत्येतच्चक्रकथितंयथाध्येयंद्दलस्वरूपकं सर्वसौभाग्यदायात्र
श्रीचक्रायमहेश्वरि दत्वापुष्पांजलिंमंत्रीपूजयेत्साधकोत्तमः सर्वसंक्षोभिणीशक्तिः
सर्वविद्रावणीतथा श्रीसर्वाकर्षिणीशक्तिःसर्वाह्लादनकारिणी सर्वसंमोहिनीश
क्तिःसर्वस्तंभनकारिणी श्रीसर्वजृंभणीशक्तिः सर्ववशंकरीतथा श्रीसर्वरंजनीश
क्तिः सर्वोन्मादनरूपिणी सर्वार्थसाधनीशक्तिःसर्वसंपत्प्रपूरिणी सर्वमंत्रमयीश
क्तिः सर्वद्वंद्वक्षयंकरीसंपूज्याःसाधकैरेतावामावर्त्तेनपार्वति कामेश्वरींचसंतर्प्यप्रण
मेद्योनिमुद्रया सर्वार्थसाधकायाथचक्रायसाधकोत्तमः पुष्पांजलिंततोदद्यात्पूजये।
त्साधकोत्तमः सर्वसिद्धिप्रदांदेवीसर्वसंपत्प्रदांतथा सर्वप्रियंकरींदेवीसर्वमंगलकारि
णीं सर्वांगसुंदरींदेवीसर्वसौभाग्यदायिनीं गंधाद्यैतैःसमभ्यर्च्यतर्पयेन्मूलदेवतां।
कामेश्वरींचदेवेशि प्रणमेद्योनिमुद्रया सर्वरक्षाकरायात्रचक्रायतत्परवेदित दत्वापुष्पां
जलिंदेविपूजयेत्सर्वदेवताः ह्रींश्रीसर्वज्ञतादेवी सर्वशक्तिस्ततःपरंसर्वैश्वर्यप्रदादेवी
ज्ञानमयीततः ततःसंपूजनीयाच सर्वव्याधिविनाशिनी सर्वाधारस्वरूपाच सर्वपाप

हणाततः सर्वानंदमयीदेवी सर्वेप्सितफलप्रदा इतिगंधाद्यैस्तैः पूज्यामूलदेवींचतर्पयेत्
मंतर्प्यमशिवांदेवींप्रणमेद्योनिमुद्रया एतद्द्वितीयचक्रंतु सर्वरूपंस्मरेद्धृदि सर्वरोगह
राख्यां चक्रायनवरूपिणे दत्वापुष्पांजलिंदेवि पूजयेद्देवताष्टकं वशिनीवाग्देवताच।
कामेश्वरीततःपरं मोदिनीवाग्देवताचविमलाप्यरुणाततः जयिनीवाग्देवताचपूज्या
सर्वेश्वरीशिवे कौलिनीवाग्देवताचपूज्यास्तास्तर्पयाम्यहं गंधाद्यैस्तत्प्रसूनाद्यैः मूल
देवींचतर्पयेत् वामचक्रेणसंपूज्यप्रणमेद्योनिमुद्रया वाग्देवताष्टकंपूज्यंरक्तपुष्पैः।
विशेषतः ॐअंतरालचक्रायदत्वापुष्पांजलिंततः दत्वाधोहस्तकमलेदेव्याःपश्चिम
भागके जंभिणंकामबाणांश्चवामाधोहस्तभागके मोहनंकामधनुश्चदक्षिणोर्द
वितस्के वशीकारंकामपाशंकामांकुशंचस्तंभनं चतुष्करण्येषुपूजयेत्तुश्राद्धया।
निच सर्वसिद्धिप्रदापात्रश्रीचक्रायमहेश्वरि दत्वापुष्पांजलिंपूजामारभेत्साधकोत्त
मः कामेश्वरींवज्रेश्वरीपूजयेत्भगमालिनीं कूटत्रयेणदेवेशि त्रिकोणेसाधको।
त्तमः इतिसंपूज्यसंतर्प्यमूलेनमूलदेवतां सर्वानंदमयापात्रश्रीचक्रायसविंदवे॥
दद्यात्पुष्पांजलिंदेवि साधकःसर्वसिद्धये मूलविद्यांसमुच्चार्यसमवायंमहेश्वरि पू
जयेत्साधकोभक्त्यामहात्रिपुरसुंदरीं इतिसंपूज्यसंतर्प्य गंधाद्यैस्तत्प्रसूनकैः धूप।

श्री॰ दीपादिभिश्चैवनैवेद्यैश्चमहत्तरैः तथाश्रीवटुकायापिदद्याद्बलिमनुत्तमं दत्वादेव्यै
५ पुनर्देविनैवेद्याचमनीयकम् तांबूलचामरच्छत्रारात्रिकादीन्निवेदयेत् संक्षोभद्रा
5 वणाकृष्टिवशोन्मादमहांकुशाः खेचरीबीजयोन्याख्यानवमुद्राः प्रदर्शयेत् सौभा
ग्यबीजन्यासेनस्वदेहंव्यापयेच्छिवे देव्यग्रेचजपंकृत्वापादुकांततःपरं वर्मसहस्रं
नाम्नांतुस्तोत्रराजस्यपार्वति शिवशक्तयोर्महादेविजपंतत्रसमर्पयेत् गुह्यातिगुह्यगो
प्त्रीत्वंगृहाणास्मत्कृतंजपं सिद्धिर्भवतुमेदेवित्वत्प्रसादान्महेश्वरि गणेशबटुकक्षेत्र
योगिनीराशिरूपिणीं देवींमंत्रमयींध्यायेन्मातृकापीठरूपिणीम् ध्यात्वात्मानंचरेद्दे
विदेवदेव्यौविसर्जयेत् प्रातःप्रभृतिसायांतंसायादिप्रातरंततः यत्करोमिजगद्योने
तदस्तुतवपूजनं संहारमुद्रयादेविदेवदेव्यौविसृज्यच स्वयंसदाशिवोभूत्वाशिवश
क्तिस्वरूपकः त्रैलोक्यंसाधकोदेविसुखंचविहरेदिति प्रयोगांश्चैववक्ष्येहमष्टौपर्व
तनंदिनि उपचारंब्रवीम्यथनचाख्येयंदुरात्मने स्तंभनंमोहनंचैवमारणाकर्षणेत
था वशीकारंतथोच्चाटंशांतिकंपौष्टिकंतथा येतेषांसाधनेवक्ष्ये जगतांहितकाम्य
या अभक्तायनदातव्यंतद्रहस्यंकदाचन रवौभूम्यांशयनात्कृत्वाप्रेतगृहांतिके
मूलंसाधकएवाशुजपेद्युतसंख्यया होमोजातीफलैःपीतैःपुष्पैश्चघृतमिश्रकैः

शत्रुसैन्यादिदस्यूनां वादिनां स्तंभनं भवेत् इति स्तंभनम् सोमे मध्याह्नसमये स्नात्वा कूप
जले तत्र कूपांतिके मंत्रं जपन् साधको युतसंख्यया होमये= नमिश्रं च माहिषं दधि शर्क
रं भस्मना तिलकं कुर्यान्मोहयेत् भुवनत्रयं इति मोहनं भौमे अर्धरात्रसमये चतुष्पथग
तः सुधीः अयुतं तत्र जपेन्मूलं होमयेत् घृतपायसं रक्तचंदनमिश्रं च वह्नौ केशैश्च समन्वि
ते शत्रुः कालसमानोपि मृत्युमेष्यति नान्यथा इति मारणम् बुधे निशावसाने तु गत्वा
शून्यालयं जपेत् अयुतं मूलमंत्रं तु होमयेत् घृतशर्करां कर्णिकारसहस्राणि बिल्व
युक्तानि पार्वति रंभाद्यप्सरसो वापि भवेदाकर्षणं ध्रुवं इत्याकर्षणं गुरौ सूर्योदये गत्वा
नदीतीरे च साधकः मूलमंत्रं महादेव्याः जपेद् युतसंख्यया होमः सर्पिर्दधि क्षीरमृद्वीका
मालतीयुतैः श्रीफलैः सहस्रादेवि वशयेद्भुवनत्रयं इति वशीकरणम् शुक्रे निशायां त्वे
गत्वा वटमूले जपेन्मनुं अयुतं साधको भक्त्या होमं कार्यं ततः सर्पिषा दधि द्राक्षा विमिश्रे
ण गोमूत्रेण च पापसैः शत्रोर्मांसमहरत्यापि भवत्युच्चाटनं ध्रुवं इत्युच्चाटनं शनौ प्रभा
तसमये कृत्वा कर्माह्निकं सुधीः आगमार्चनशय्यां तु जपेन्मंत्रायुतं शिवे होमयेत् सर्पिरं
भोजसहस्राणि चतुर्दश ग्रहाणां देवकोपानां पक्षिणां रक्षसामपि उपद्रवाणां सर्वेषां

श्री. भयानांन्टपतेस्तथा क्रूराणामपिदुष्टिनांमहाशांतिप्रजायते इतिशांतिकम् सर्ववा
६ रेषुसर्वत्रजपेन्मंत्रंतथाहुते होमस्तुसर्पिर्ब्लोटमिश्रंचंदनमिश्रितं पायसंतत्कमिश्रंच
6 मीनमांससमन्वितं देवतानांमनुष्याणांरोगार्त्तानांमहेश्वरि ब्रह्मादीनांन्टपादीनांमहा
पुष्टिःप्रजायते इतिपौष्टिकम् इतीदंपटलंगोप्यंप्रथमांगंमहेश्वरि मांत्रिपुरसुंदर्याश्
तुणीयंस्वपुत्रवत् गुह्यंगुह्यतमंगोप्यंगोपनीयंस्वयोनिवत् इतिश्रीरुद्रयामलेतंत्रेश्री
त्रिपुरसुंदर्याद्याःपटलंसमाप्तम् श्रीरस्तु ॥

श्री॰
१

ॐ अस्य श्रीमच्छ्रीमहात्रिपुरसुंदरीराजराजेश्वरीमंत्रराजस्य श्रीदक्षिणामूर्तिऋषिः पंक्तिः
छंदः श्रीपराभट्टारिकामहात्रिपुरसुंदरीदेवता ऐं बीजं सौः शक्तिः क्लीं कीलकं मम भोगापव
र्गसिद्ध्यर्थे जपे विनियोगः ततः श्रीदक्षिणा॰ ऋ॰ शि॰ पंक्ति छंदसे न॰ मुखे श्रीपरदेवतायै नमो
हृदि ऐं बीजाय नमः गुह्ये सौः श॰ पादयोः क्लीं कीलकाय नमः नाभौ मम भोगापवर्गसिद्ध्य
र्थे जपे विनियोगः सर्वांगेषु इति न्यसेत् ऐं श्रीं ह्रीं क्लीं अंगुष्ठाभ्यां नमः क्लीं ऐं सौः तर्जनीभ्यां
स्वाहा सौः ॐ ह्रीं श्रीं मध्यमाभ्यां वषट् ऐं त्रिपुरे अनामिअनामिकाभ्यां हुं क्लीं सौः ऐं कनिष्ठि
काभ्यां वौषट् सौः क्लीं ह्रीं श्रीं करतलपृष्ठाभ्यां फट् २ ऐं श्रीं ह्रीं क्लीं हृदयाय नमः क्लीं ऐं सौः
शिरसे स्वाहा सौः ॐ ह्रीं श्रीं शिखायै वषट् ऐं त्रिपुरे कवचाय हुं क्लीं सौः ऐं नेत्रत्रयाय वौषट्
सौः क्लीं ह्रीं श्रीं अस्त्राय फट् अथ ध्यानं बालार्कायुततेजसं त्रिनयनां रक्तांबरोल्लासिनीं
नानालंकृतराजमानवपुषं बालेंदुरेखशेखरां हस्तैरिक्षुधनुः सृणिं च सुशिरं पाशं मुदा
बिभ्रंतीं श्रीचक्रस्थितसुंदरीं त्रिजगतामाधारभूतां स्मरेत् २ सुधासिंधोरित्यादि १०८ जपा
न्यस्य न्ते मालां मूर्ध्नि प्राणायामः करषडंगन्यासः गुह्याति शेति त्वं मालाक्षति योन्यानमेत् ॥
कालदंष्ट्रे भयंकारिके मार्थ्यं दारय २ मर्द २ हन २ हुं फट् स्वाहा ॥ उपोषितो मृत्वा कृष्णाष्ट
म्यां कृष्णचतुर्दश्यां रवौ वा अष्टोत्तरसहस्रं जपेत् ततः श्मशानभूमिं गत्वा दग्धमृद्माती
यशत्रुनाम्नाभिधाय पुत्तलकं विमृद्य धूमस्कराजिकारक्तचंदनकुंकुमैरेभिर्द्रव्यैः शा
धाय

त्रोर्नामाक्षराणि षट्कोणयंत्रमध्ये विलिख्य तद्हृदये भूर्जपत्रं निवेश्य तद्धृदयं निमीलये
त् द्रव्यशोधेण पुत्तलकमर्चयेल्लेपयेच्च ततस्तद्द्रव्येण कृत्स्नप्रस्तैः पूजने ७ सप्तवर्त्तुरकंटका
न्यादाय निशितशस्त्रया पूर्णमंत्रं पठन्वेधयेत् मस्तवेधे भवेन्मूको वधिरः कर्णवेधतः चक्षु
र्वेधे भवेदंधः नाभिस्कंधे कंठवेधतः मरणं प्राप्नुयाच्छत्रुर्महारोगार्दितस्तथा हृत्स्वेधे नक
र्मकः सर्वमस्त्रवेधयेत् हृत्स्वेधात्स्वयं शत्रुः खप्राप्नुयादिति निश्चितं ततः शूलैर्वेधितं तत्पु
त्तलकं कृत्स्नवस्त्रेण वेष्टयित्वा श्मशाने दक्षिणदिग्भागे निखनेत् शत्रुस्तत्कालमेव तथा
मृतो भवति ततो निःसार्य कंटकान्स्वल्पजले प्रवाहयेत् शत्रुः स्वस्थो भवेत् रविवारे चतु
र्दश्यां भौमे त्रयोदश्यां शनौ अमावास्यां ओं नमो भगवते उड्डामरेश्वराय अमुकस्य नाशं
कुरु कुरु ठः ठः स्वाहा सहस्रं जपेत् दक्षिणाभिमुखः जपेदेकविंशति दिनं २१ पश्चाद्दा
नं गोवस्त्र सुवर्ण शिवप्रतिमादीनां कांस्यपात्रं सघृतं दद्यात् सर्वत्र बलिदानं ॥

१ ॐश्रीगुरवेशिवायैनमः श्रीगणनाथायैनमः ॐश्रीभैरवउवाच ॐअधुनापद्धतिंवक्ष्येत्रिकूटार्चनसंयुतां गद्यप
द्यमयींगोप्यांसकलागमनिश्रितां प्रातःकृत्यमकृत्वातुयोदेवींभक्तितोर्चयेत् तस्यपूजात्तुविफलाशौचही
नायथाक्रिया तत्रश्रीमान्नाथकोब्राह्मेमुहूर्त्तेशयनतलादुत्थायकरचरणौप्रक्षाल्याचम्य निजासनेस
मुपविश्य निजशिरसि श्वेतवर्णाधोमुखसहस्रदलकमलकर्णिकांतर्गतचंद्रमंडलसिंहासनोपरिनि
षण्णं स्वगुरुंशुक्लवर्णं शुक्लालंकारभूषितं ज्ञानानंदमुदितमानसं सच्चिदानंदविग्रहं त्रिनयनंचतुर्भुजं
ज्ञानमुद्रापुस्तकवराभयकरं वामांगेवामहस्तधृतकमलयारक्तवसनाभरणया स्वप्रिययादक्षभुजे
नालिंगितं सर्वदेवाधिदेवं सर्वतीर्थतीर्थं परमशिवस्वरूपंशांतं स्वप्रसन्नंध्यात्वा तच्चरणकमलयुगल
विगलदमृतधारयास्वात्मानंप्लुतंविभाव्य मानसोपचारैराराध्य ॐ लंपृथिव्यात्मकंगंधंश्रीगुरुपादु
कायैसमर्पयामिनमः ॐ हं आकाशात्मकंपुष्पंश्रीगुरुपादुकायैसमर्पयामिनमः ॐ यं वाय्वात्मकंधू
पंश्रीगु॰ ॐ रं वह्न्यात्मकंदीपंश्री॰ ॐ वं अमृतात्मकंनानानैवेद्यंश्री॰ ॐ संसर्वात्मकंफलमूलतांबूला
दिकंश्रीगुरुपादुकायैसमर्पयामिनमः इत्थंश्रीगुरुमभ्यर्च्य ॐऐंह्रींश्रींहसखफ्रेंहसक्षमलवरयूंसहख
फ्रेंसहक्षमलवरयींह्सौंःस्हौंः श्रीमच्छ्रीस्वामिश्रीप्रतापकौलानंदनाथश्रीपादुकांश्रीमच्छ्रीदयावत्प
म्बाश्रीपादुकांपूजयामिनमः ९ इतिदशधाविमृश्यमनसादंडवत्प्रणामंकुर्यात् तत्रप्रणाममंत्रोयथा ।
ॐसहस्रदलपंकजेसकलशीतरश्मिप्रभंवराभयकरांबुजंविमलगंधपुष्पांबरंप्रसन्नवदनेक्षणंसक

लदेवतारूपिणींस्मरेच्छिरसिहंसगंतदभिधानपूर्वंगुरुं ॐनमामिसद्गुरुंशांतंप्रत्यक्षंशिवरूपिणं शिरसायोगपीठ
स्थंमुक्तिकामार्थसिद्धये १ श्रीगुरुंपरमानंदंवंदाम्यानंदविग्रहं यस्यसान्निध्यमात्रेणचिदानंदायतेपरं २ अखंडमं
डलाकारंव्याप्तंयेनचराचरं तत्पदंदर्शितंयेनतस्मैश्रीगुरवेनमः ३ अज्ञानतिमिरांधस्यज्ञानांजनशिलाकयाच
क्षुरुन्मीलितंयेन तस्मैश्रीगुरवेनमः ४ गुरुर्ब्रह्मागुरुर्विष्णुर्गुरुःसाक्षान्महेश्वरः गुरुरेवजगत्सर्वंतस्मैश्रीगुरवे
नमः ५ नमस्तेनाथभगवञ्छिवायगुरुरूपिणे विद्यावतारसंसिद्ध्यैस्वीकृतानेकविग्रह ६ नवायनवरूपायपर
मार्थैकरूपिणे सर्वाज्ञानतमोभेदभानवेचिद्घनायते ७ स्वतंत्रायदयाक्लृप्तविग्रहायपरात्मने परतंत्रायभक्ता
नांभव्यानांभव्यरूपिणे ८ विवेकिनांविवेकायविमर्शायविमर्शिनां प्रकाशिनांप्रकाशायज्ञानिनांज्ञानरूपिणे ९
पुरस्तात्पार्श्वयोःपृष्ठेनमस्कुर्यामुपर्यधः सदामच्चित्तरूपेणविधेहिभवदासनं १० इतिगुरुंप्रणम्यस्वप्रसन्नंविभा
व्य मनसातदाज्ञांगृहीत्वामूलाधारेस्वर्णवर्णचतुर्दलकमलकर्णिकांतर्गतशृंगाटकांतर्गतत्रिकोणचक्रपीठोप
रि परांशक्तिंकुंडलिनींसर्पाकारां ऊर्ध्वमुखींसार्धत्रिवलयां उद्यद्दिनकरसहस्रभास्वरांविद्युत्कोटिसन्निभां बिसतं
तुतनीयसीं पंचाशद्वर्णविग्रहांअष्टात्रिंशत्कलारूपिणीं त्रिधामधामानंसर्वदेवाधिदेवींसर्वप्राणिजीवांसक
लमंत्रमातरंसुप्तांविभाव्य श्रीगुरूपदिष्टनिजसहजनादेनसचैतन्यांविधाय तत्रचतुर्षुदलेषु वंनमः शंनमः
षंनमः संनमः इतिपत्रेषु मध्येमूलेनचप्रादक्षिण्येनसंपूज्य पूर्वोक्तमंत्रेणकमलात्कमलंनीत्वा ततःस्वाधिष्ठा
नेलिंगमूलेविद्रुमवर्णषट्दलकमलेतांसमानीय तत्रबंनमः भंनमः मंनमः यंनमः रंनमः लंनमः इतिपत्रेषु
मध्येमूलेनचसंपूज्य ततोमणिपूरकेनाभौ नीलवर्णदशदलकमलेतांप्रापय्य तत्रडंनमः ढंनमः णंनमः

श्री· लेमन्त्रैस्सेवचेरेत्सज्जं त्रिकूटायाः महेश्वरि श्रणुत्वंभक्तिभावेनयथावद्दर्शयतेमया अथाय
२ शयनाद्देवि ब्राह्मदिवेमुहूर्तके प्रक्षाल्यमुखहस्तांघ्रीनाचमेत्त्रिः महेश्वरि प्राणायामत्रयं
कृत्वागुरुंध्यात्वासशक्तिकं देवींकामेश्वरांकोपविष्टांकामेश्वरींस्मरेत् ध्यात्वापूर्वेणषड्
दीर्घैःन्यासंकृत्वायथाविधि जपेन्मूलंचगायत्रींगुरवेचसमर्पयेत् आगत्यबहिरोंकारं
जपन्नारण्यभूमिषु तत्रमूत्रादिकंत्यज्यवर्णोंकांशौचमाचरेत् रमाबीजेनसंशोध्यदंता
न्साधकसत्तमः मायाबीजेनगंडूषत्रयंकुर्यान्महेश्वरि मूलेनदेवितीर्थानितदावाह्यस्व
सिद्धये ओंगंगेचयमुनेचैवगोदावरिसरस्वति नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधिंकुरु
इत्यावाह्यमहादेविदेवीमावाहयेत्ततः मूलेनत्रिःसमुत्सृज्य तर्पयेत्सिमहेश्वरि ततो
मूलंजपेन्मंत्रीगायत्रींचविशेषतः सूर्यायार्घ्यत्रयंदद्याद्देवदेव्यास्तथैवच ओंत्रिपुरेदे
विविद्महेश्रादिकूटसमन्विते कामेश्वरिधीमहिचद्वितीयकूटभूषिते तृतीयकूटपूर्वे
च ततःक्लिन्नाप्रचोदयात् त्रिः जलादाकृष्यवासांसिपरिधायचसाधकः संध्यांसमत
सांकृत्वाचाघमर्षणपूर्वकं संध्यांनिर्वर्त्यदेवेशियागगेहंततोव्रजेत् ततःद्वारार्चनंकृ
त्वाकुर्यादासनशोधनं भूतशुद्धिंततःकुर्यात्प्राणार्पणविधिंततः षोडशान्यासभागेन
देहंदेवमयमचरेत् मनसावर्णभागोत्थंश्रीचक्रंतत्रभावयेत् विभाव्यतत्रश्रीचक्रंहृद

येन्नायको नमः योगपीठं ततोभ्यर्च्य हृत्तेषरं लंवं इति विंदौ कामेश्वरांकोपविष्टां कामेश्वरीं स्मरेत्
पात्राणि स्थापयेत्तत्र त्रिकोणे जलनिर्मिते चतुरस्रं मंडलं च विधाय गंधकांबुभिः सामान्यार्घ्यं त्रि
कूटाया मंडलं पूजयेच्छिवे चतुरस्रं मंडलं च समभ्यर्च्य चरेत्ततः ॐ अस्त्राय फडिति संस्थाप्या
त्र त्रिपादिकां तत्रास्त्रक्षालितं शंखं समभ्यर्च्य तथा सुधीः तत्रार्कमंडलं देवि सोमवह्न्योश्च मंड
ले संपूज्य मूलमंत्रेण कलात्मकं समर्चयेत् मूलाष्टमंत्रितं देवि विधाय तीर्थवारि च तेना
र्घ्यं शिवे शंखं वा मुद्रां निवेश्य च तीर्थमावाह्य देवेशि हृत्तत्रैव भावयेत् सामान्यार्घ्य
स्य वामे तत्र शोधितं कलशं शिवे अस्त्रं चैव षडस्रं च हृत्तत्र योन्यस्रं मंडले शुद्धास्त्रैः समभ्यर्च्य
तत्र कूटत्रयेण च षडंगन्यासभागेन समभ्यर्च्य षडस्रकम् चतुरस्रं तथाभ्यर्च्य संस्थाप्याथ
त्रिपादिकां कलाः सूर्येंदुवह्नीनां समभ्यर्च्य यथाविधि कलशेस्मिन्महादेवि देवीं संपूजयेत्परा
श्रानंदभैरवं चैव देवि कूटत्रयेण च मायारमाकामबीजैः धेनुमुद्रां प्रदर्शयेत् मत्स्यमुद्रादि
नाच्छाद्य सामान्यार्घ्यस्य दक्षिणे कलशार्द्धे मंडले च विधायात्र महेश्वरि शक्तिपात्रं समादा
य मूलेनाष्टाभिमंत्रितं तत्रैव प्रोक्षणीपात्रं तथा वटुकपात्रकं गुरुपात्रादि संस्थाप्यं तीर्थशोधा
दयोस्तथा पंचपात्राकारेण देवेशि पात्राणि स्थापयेत्ततः पाद्यार्घ्यमधुपर्काचमनीयपात्रपूज
ने विधाय तत्र श्रीदेव्या न्यासं षडंगपूर्वकं मणिपूरे ज्वलद्रूपं मूलाधारादिके शिवे शिवश

२
3

चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव इतिमालांप्रपूज्य ॐअंमाविघ्नंकुरुमालेत्वं इतिदक्षकरेण
गृहीत्वा एकाग्रमनामूर्ध्निश्रीगुरुंहृदिदेवीं यथोक्तरूपांकंठेपीतवर्णां मूलविद्यांध्यायन् यथाशक्ति
जपंकुर्यात् जपांतेमालांमूर्ध्निसंस्थाप्य पूर्ववत्प्राणायामऋष्यादिकरषडंगन्यासध्यानांतेविधाय ॐत्वं
मालेसर्वदेवानांप्रीतिदाशुभदाभव शुभंकुरुष्वमेभद्रेयशोवीर्यंचसर्वदा इतिमालांशिरस्यसमर्पणार्थं
गृहः संस्थाप्य ॐगुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपं सिद्धिर्भवतुमेदेवि त्वत्प्रसादान्महेश्वरि इत्यने
नतेजोमयंजपफलंश्रीदेव्यावामहस्तेसमर्प्य योनिमुद्रयाप्रणम्य स्वकार्यानुष्ठानाय ॐप्रातःप्रभृतिसा
यांतं सायादिप्रातरंततःयत्करोमिजगद्योनेतदस्तुतवपूजनं ॐत्रैलोक्यचैतन्यमयेसुरेशिश्रीसुंदरि
त्वच्चरणाज्ञयैव प्रातःसमुत्थायतवप्रियार्थं संसारयात्रामनुवर्तयिष्ये संसारयात्रामनुवर्तमानंत्वदा
ज्ञयाश्रीत्रिपुरेपरेशिस्पर्धातिरस्कारकलिप्रमादभयानिमांमाभिभवंतुमातः जानामिधर्मंनचमेप्रवृ
त्तिर्जानाम्यधर्मंनचमेनिवृत्तिः त्वयाहृषीकेशिहृदिस्थयाहंयथानियुक्तोस्मितथाकरोमि इतिश्रीदेव्या
ज्ञांप्रार्थ्यजपाजपंसंकल्पसमर्पयेत् ॐअद्यपूर्वेद्युरहोरात्राचरितमुच्छ्वासनिःश्वासात्मकं षट्शताधि
कमेकविंशतिसहस्रसंख्याकमजपाजपमहंकरिष्ये इतिसंकल्प्य ४ अद्यसूर्योदयमारभ्यश्वआगामि
सूर्योदयंयावदहोरात्रेणोच्छ्वासनिःश्वासात्मकं षट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपं ॥
मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाब्रह्मरंध्रेषु चतुर्दलषट्दलदशदलद्वादशदलषो
डशदलद्विदलसहस्रदलेषु स्वर्णविद्रुमनीलपिंगलधूम्रविद्युत्कर्बुरवर्णेषु स्थिताभ्योगणपतिब्रह्मवि

स्गुरुइजीवात्मपरमात्मश्रीगुरुपादुकाभ्योयथाभागशः समर्पयामिनमः ॐ मूलाधारचक्रस्थायगणपतयेऽ
जपाजपानांषट्शतानिसमर्पयामिनमः ॐ स्वाधिष्ठानचक्रस्थायब्रह्मणेऽजपाजपानांषट्सहस्राणिसम
र्पयामिनमः ॐ मणिपूरकचक्रस्थायविष्णवेऽजपाजपानांषट्सहस्राणिसमर्पयामिनमः ॐ अनाहत
चक्रस्थायरुद्रायाऽजपाजपानांषट्सहस्राणिसमर्पयामिनमः ॐ विशुद्धचक्रस्थायजीवात्मनेऽजपाज
पानांसहस्रंसमर्पयामिनमः ॐ आज्ञाचक्रस्थायपरमात्मनेऽजपाजपानांसहस्रंस· ॐ सहस्रदलकमल
कर्णिकामध्यस्थायेश्रीगुरुपादुकायैअजपाजपानांसहस्रंस· इत्यजपाजपंसमर्प्यजपामंत्रेणैवप्राणा
यामंविधायन्यसेद्यथा ॐ अस्यश्रीअजपागायत्रीमंत्रस्यहंसऋषिः अव्यक्तगायत्रीछंदः परमात्मादेवता
हंबीजं सःशक्तिः सोहंकीलकं ॐकारस्तत्वं उदात्तःस्वरःनभःस्थानं हैमोवर्णः मममोक्षार्थेजपेविनियो
गः इतिकृतांजलिःस्मृत्वान्यसेत ॐ हंसात्मनेऋषयेनमःशिरसि ॐ अव्यक्तगायत्रीछंदसेनमःमुखे पर
मात्मनेदेवतायैनमःहृदि हंबीजायनमःगुह्ये सःशक्तयेनमः पादयोः सोहंकीलकायनमः नाभौ ॐकार
तत्वायनमःमूर्ध्नि उदात्तायस्वरायनमःकंठे नभसेस्थानायनमःहृदि हैमायवर्णायनमः सर्वांगेषु मममो
क्षार्थेविनियोगः इतिकृतांजलिर्वदेत ॐ हंसांसूर्यात्मनेस्वाहा अंगुष्ठाभ्यांनमः ॐ ह्रींसोमात्मनेस्वाहा
तर्जनीभ्यांस्वाहा ॐ ह्रूंनिरंजनात्मनेस्वाहा मध्यमाभ्यांवषट् ॐ ह्रैंनिराभासात्मनेस्वाहा अनामिकाभ्यां
हुं ॐ ह्रौंअनंततनुःसूक्ष्मादेवीप्रचोदयात्स्वाहा कनिष्ठिकाभ्यांवौषट् ॐ ह्रःअव्यक्तबोधात्मनेस्वाहा
करतलपृष्ठाभ्यांफट् इतिकरन्यासः एवंषडंगः ॐ ध्यायेन्मूर्धानंयस्यविप्रावदंति एवंवैनाभिंचंद्रसूर्यौचनेत्रे

४ दिग्भिःश्रोत्रेयस्यपादौक्षितिश्च ध्यातव्योसौसर्वभूतांतरात्मा इतिविराट्स्वरूपंस्वात्मानंध्यात्वा तदनुसं
५ व्यापीप्राणवायोर्निर्गमप्रवेशात्मकमजपामंत्रंपंचविंशतिवारंजप्त्वासमर्प्य योनिमुद्रयाश्रीगुरुंप्रणम्य
श्रीगुरूपदिष्टमार्गेणनादानुसंधानपूर्वकं निरस्तसमस्तोपाधिनाकेनापिचिद्विलासेन प्रवर्त्तमानोस्मी
ति विभाव्य स्वकार्यानुष्ठाय ॐसमुद्रमेखलेदेवि पर्वतस्तनमंडले विष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षम
स्वमे इतिभूमिंप्रार्थ्य मूलमन्त्रंस्मृत्वादंश्वासानुसारेणतस्यांभूमौ निधाय पदेपदेमूलमन्त्रंस्मरन्ग्रामाद्बहि
र्याम्यांवानैरृत्यांदिशिशरक्षेपमात्रंभुवमतीत्य मलमूत्रोत्सर्गशौचाचमनदंतधावनादिकंविधाय प्रति
षिद्धदिनेषुविहितकाष्ठेन ॐ क्लींकामदेवायसर्वजनप्रियायनमः इतिदंतान्विशोध्य जिह्वांमूलमन्त्रेणलि
ख्य दंतधावनंनिर्भिद्यसंशोध्यस्वपुरतः शुचौदेशेनिक्षिप्य मूलेनमुखंप्रक्षाल्याचम्यद्वादशगंडूषाणि
कृत्वा समस्तप्रपंचंश्रीमत्त्रिपुरेविकामयंविभाव्य कुलकुशतिलमृदादिकंगृहीत्वानद्यादौगत्वा तत्र
तीर्थाद्बहिःकटिशौचंविधाय मलापकर्षणस्नानंविधाय स्वशाखोक्तविधिना वैदिकस्नानंविधाय नाभि
मात्रेजलेस्थित्वा ॐअद्यामुकमासस्येत्यादि श्रीपरदेवताप्रीत्यर्थंतांत्रिकस्नानमहंकरिष्ये इतिसंकल्प्य।
प्राणायामंकृत्वा स्वमूलमन्त्रऋष्यादिकरषडंगन्यासांश्चकृत्वा स्वपुरतोजलेहस्तमात्रंतीर्थंपरिकल्प्य ॐब्रह्मा
ण्डोदरतीर्थानिकरैःस्पृष्टानितेरवे तेनसत्येनदेवेशतीर्थंदेहिदिवाकर इतिसूर्यात्तीर्थंप्रार्थ्य क्रोमितिअंकुशमु
द्रयासूर्यमण्डलंभित्त्वा ॐगंगेचयमुनेचैवगोदावरिसरस्वति नर्मदेसिंधोकावेरिजलेस्मिन्सन्निधिंकुरु इति
सूर्यमण्डलात्तीर्थमाकृष्य पुरःकल्पिततीर्थेसंयोज्य ॐ ह्रांह्रींह्रूंह्रैंह्रौंह्रः सर्वानन्दमयेतीर्थशक्तेपरेहिस्वा

हा इति तीर्थशक्तिमावाह्य तस्मिंस्तीर्थमाऽऽले तां ध्यायेद्यथा ॐ सर्वानन्दमयीमशेषदुरितध्वंसां मृगांकप्र
भां अब्जौ चोर्ध्वकरद्वयेन दधतीं पाशं सृणिं चक्रमात् दोर्भ्यां चामृतपूर्णहेमकलशं मुक्ताक्षमालाम्बरां गं
गां सिंधुसरिद्वयादिसहितां श्रीतीर्थशक्तिं भजे इति ध्यात्वा ॐ नमो भगवति अंबे अंबालिके अंबिके महामा
लिनि एह्येहि भगवति अशेषतीर्थालवाले ह्रीं श्रीं शिवजटाधिरूढे गंगे गंगांबिके स्वाहा इति मंत्रेण सप्तधा
भिमंत्र्य ह्रीमित्यालोड्य वमिति धेनुमुद्रयामृतीकृत्य प्रथमकूटं आत्मतत्वात्मने नमः १ द्वितीयकूटं विद्या
तत्वात्मने नमः २ तृतीयकूटं शिवतत्वात्मने नमः ३ इति तत्वत्रयं जले विन्यस्य तत्र श्रीचक्रं विभाव्य हृदयक
मलाद्देवीमावाह्य षडंगेन सकलीकृत्य तां सावरणां स्थापयित्वा योनिमुद्रया मूलेन तज्जलमष्टधाभिमंत्र्य
तत्र देवतास्मरणपूर्वकं त्रिर्निमज्योन्मज्य कुंभमुद्रया मूलविद्यया स्वशिरसि त्रिरभिषिच्य मूलेन देवीं त्रिर
भिषिच्य त्रिः संतर्प्य श्रीदेवीं स्वहृदि समानीय ४ मूलं प्रथमकूटं आत्मतत्वं शोधयामि स्वाहा ४ द्वितीयकूटं मूलं
मूलं विद्यातत्वं शोधयामि स्वाहा ४ तृतीयकूटं शिवतत्वं शोधयामि स्वाहा इति त्रिराचम्य तीरमागत्य धौतवाससी प
रिधाय त्रिपुंड्रकमूर्ध्वपुंड्रकं वा तिलकं विधाय वैदिकसंध्यां समाप्य तांत्रिकीमारभेत यथा तत्र विधिवदाचम्य
मूलेन त्रिशिखां बद्ध्वा प्राणायामऋष्यादिकरषडंगन्यासान्विधाय स्वपुरतो धेनुमुद्रया तत्र वरचितं तीर्थजल
ममृतीकृत्य मूलेनाष्टधाभिमंत्र्य तेन जलेन अं नमः इत्यादि क्षकारांतैः मातृकाक्षरैः स्वशिरः प्रोक्ष्य मूलेन
च त्रिः प्रोक्ष्य सूर्यमंडले देवीं ध्यात्वा दक्षहस्तेन जलमादाय वामेनाच्छाद्य लं वं रं यं हं इति पाञ्चभौतिकमंत्रैः
सप्तवारमभिमंत्र्य मूलेन च त्रिरभिमंत्र्य तज्जलबिंदुभिस्तत्वमुद्रया मूलेन स्वशिरसि त्रिः प्रोक्ष्य अवशिष्टजलं वा

५ 5

महस्तेनिधाय तेजोरूपंतज्जलंसुषुम्नयाइडयाकृष्य स्वदेहांतःस्थितंसकलकल्मषंप्रक्षाल्य तज्जलंकृ
ष्णवर्णंपिंगलयाबहिर्निर्गतंमत्वा पुनर्दक्षहस्तेकृत्वा स्ववामभागेज्वलद्वज्रशिलांध्यात्वा ॐश्रीं
पशुहूंफट् इतिपाशुपतास्त्रमंत्रेणतस्यांशिलायामास्फाल्य हस्तौप्रक्षाल्य मूलेनजलमादाय प्रवु
हन्नाड्यासहस्रदलपद्मामृतेनैकीभूतंविभाव्य निर्गमय्यतेनजलेनामृतमालिन्यैस्वाहा इतिम
न्त्रेणकुशैःस्वशिरस्त्रिःप्रोक्ष्य ॐऐंह्रींश्रींप्रथमकूटं आत्मतत्त्वंशोधयामिस्वाहा ॐ द्वितीयकूटंवि
द्यातत्त्वंशोधयामिस्वाहा ॐ तृतीयकूटंशिवतत्त्वंशोधयामिस्वाहा इतित्रिराचम्य पतद्ग्रहेपरीत्येनच
त्रिः ॐ सर्वमूलं सर्वतत्त्वंशोधयामिस्वाहा इतिचत्रिराचमेतिनवधाजलेनाचम्य जलमंजलिनादा
योत्थाय ॐ ऐंप्रथमकूटंत्रिपुरेदेविविद्महे क्लींद्वितीयकूटंकामेश्वरिधीमहि सौःतृतीयकूटं तन्नः
शक्तिःप्रचोदयात् श्रीमहात्रिपुरसुंदरीश्रीपादुकायैपद्योर्घ्यःस्वाहा इतित्रिरर्घ्यंदत्वा ॐह्रांह्रींहंसःश्री
सूर्यपद्यतेर्घ्यःस्वाहा इतिकुलसूर्यायार्घ्यंदत्वा मूलेनदेवींत्रिःसंतर्प्य श्रीसूर्यंचत्रिःसंतर्प्य मूलाधारेप्र
थमकूटंकृष्णवर्णंमूलादिब्रह्मरंध्रांतंध्यात्वा आकाशस्थवह्निमंडलेसमावाह्य तत्रबालांवागीश्वरींध्या
त्वा ऐंत्रिपुरेदेविविद्महेवागीश्वरिधीमहि तन्नोमुक्तिःप्रचोदयात् इत्यनयामूलदेव्यैअर्घ्यंदत्वात्रिःसंत
र्प्य श्रीगुरुंप्रणम्य प्राणायामऋष्यादिकरषडंगन्यासपूर्वकं पूर्वोक्तांमूलगायत्रींजप्त्वा प्रातर्वागीश्वरीगा
यत्रीमपिजप्त्वा प्रथमकूटमपिजप्त्वामूलमपियथाशक्तिजप्त्वा प्राणायामादिनाजपंदेव्यैसमर्प्य सूर्यमंडला
न्मूलदेवींस्वरूपदिवह्निमंडलाच्च वागीश्वरींस्वकूटसहितांमूलाधारेविसृज्य श्रीगुरुंप्रणमेदितिप्रातःस।

ध्यानविधिः अथ मध्याह्नसंध्या तत्र प्राणायामादि सूर्यतर्पणांतं प्रातःसंध्यावदेव विधाय वीजसंध्यां कु
र्यात् तत्र मध्याह्ने अनाहतचक्रे मूलविद्याया द्वितीयकूटं रक्तवर्णं ध्यायेत् ततस्तेजो वहिः सूर्यमण्डले
समावाह्य तत्र कामेश्वरीं यौवनरूपां ध्यात्वा क्लीं त्रिपुरे देवि विद्महे कामेश्वरि धीमहि तन्नः क्लिन्ने प्र
चोदयात् इत्यनया देव्यै अर्घ्यं दत्वा पुनः यथाशक्ति जप्त्वा तुरीयां मूलगायत्रीमपि जप्त्वा द्वितीयकूटं
मूलमपि यथाशक्ति जप्त्वा प्राणायामादि पूर्वकं जपं समर्प्य प्रणम्य मूलदेवीं कामेश्वरीं च स्वस्वहृदि स्व
कूटसहितां विसृज्य श्रीगुरुं प्रणमेदिति मध्याह्नसंध्या अथ सायंसंध्या तत्र प्राणायामादि सूर्यतर्प
णांतं पूर्ववद्विधाय वीजसंध्यां कुर्यात् सायमाज्ञाचक्रे तृतीयकूटं शुद्धस्फटिकनिर्मलमाकाशस्य
सोममंडले समावाह्य तत्रामृतेश्वरीं प्रौढां ध्यात्वा सौः त्रिपुरे देवि विद्महे शक्तीश्वरि धीमहि तन्नोऽमृ
ते प्रचोदयात् इत्यनयार्घ्यं दत्वा तुरीयगायत्रीमेतां गायत्रीं च यथाशक्ति तृतीयकूटं मूलविद्यां च ज
प्त्वा प्राणायामादि पूर्वकं जपं समर्प्य सोममण्डलान्मूलदेवीं हृदि अमृतेश्वरीं चाज्ञाचक्रे समानीय ।
श्रीगुरुं प्रणमेदिति सायंसंध्या अथार्धरात्रसंध्या अर्कमंडले देवीध्यानं विना प्राणायामाद्याचमनप
र्यंतं पूर्ववद्विधाय सहस्रारे तुरीयवीजं मूलविद्यात्रयोदशाक्षररूपं पद्मरागप्रभं ध्यात्वा वह्निस्तारा
मंडले समावाह्य तत्र भगवतीं यथोक्तरूपां ध्यात्वा तुरीयवीजेन सह तुरीयगायत्र्या तत्र मूलदेव्यै अ
र्घ्यं दत्वा तुरीयगायत्रीं तुरीयविद्यां मूलविद्यां च यथाशक्ति जप्त्वा समर्प्य श्रीदेवीं हृदि तुरीयदेवीं त

श्री०
९

तीयवीजेनचसहस्रारेविसृज्य तीर्थंचविसृज्य कामकलारूपमात्मानंध्यायेदितितुरीयसंध्या एतत्सं
ध्याचतुष्टयमावश्यकंकार्यं अथवाप्रातरेवचतुष्टयं केवलेववाप्रातःसंध्या कार्यातत्पजेदितिशि
वशासनम् इत्थंसंध्याकरणानंतरंवैदिकंतर्पणंसमाप्यतांत्रिकमारभेत तत्रप्राणायामादिपूर्वकं
स्वगुरुतोजलेपूर्ववत्तीर्थमावाह्यवमितियेतुमुद्रयामृतीकृत्य मूलेनाष्टवारमभिमंत्र्य तत्रश्रीचक्रं
विभाव्यतत्रदेवीमावाह्य मनसासर्वोपचारैःसंपूज्य मूलंश्रीमहात्रिपुरसुंदरीश्रीपादुकांतर्पयामिन
मः इतियथाशक्तिसंतर्प्य यथाशक्त्यावरणदेवताश्चसंतर्प्य मूलं सायुधसवाहनसपरिकरसावरण
श्रीत्रिपुरसुंदरीपादुकांतर्पयामीति संतर्प्य ऐशान्यां श्रीमच्छ्रीस्वामिप्रतापकौलानंदनाथश्रीपादु
कांतर्पयामि इतित्रिःसकृद्वासंतर्प्य वह्नौपरमगुरुं नैरृत्यांपरमाचार्यंवायव्येपरमेष्ठिगुरुंचसंतर्प्य
तीर्थंस्वस्थानेविसृज्य प्राणायामादिपूर्वकंजपंसमर्प्ययेदितितर्पणं ततउत्थायमौनीमूलंस्मरन्या
गगेहमागत्य जलादिनाद्वारदेवताःपूजयेत् सुधार्णवचतुष्टयायनमः श्रं·५· नवखंडविराजितायन
वरत्नद्वीपायनमः ५ नंदनोद्यानायनमः ५ स्वर्णप्राकारायनमः तद्वारस्यदक्षोत्तरकाष्ठयोरूपर्यधश्च
५ गंगणपतयेनमः ५ क्षंक्षेत्रपालायनमः ५ वामे द्वांद्वारश्रियेनमः ५ दंदेहल्यै· ५ अधःकंदेवा
कातनाय· ५ श्रीरत्नमंडपाय·५ वाराह्यै इतिसंपूज्य द्वारोर्ध्वशाखायां दक्षिणे ५ मांमहालक्ष्म्यै
वामे ५ संसरस्वत्यै· मध्ये ५ दुर्गायै·५ द्वांद्वारश्रियै· द्वारस्यदक्षवामशाखयोरधोधः ५ शंशंखनि

थिवह्ययाराभ्योनमः ॐ गंगणपतयेनमः ॐ क्षंक्षेत्रपालायनमः ॐ मांमायाशक्त्यैनमः ॐ चिंचिल्लम्ब्यै
नमः ॐ गंगंगायै· ॐ यंयमुनायै ॐ धंधात्रे· ॐ विंविधात्रे ॐ दोंदेहल्यै· द्वाराग्रे ॐ वंवरुणाय· इतिपश्चिम
द्वारे उत्तरे ऊर्ध्वशाखायां प्राग्वन्महालक्ष्मीसरस्वत्यौसंपूज्य मध्ये ॐ वांवटुकाय· द्वांद्वारश्रियै· संसोमाय·
पूर्वद्वारे लंइंद्रायनमः ग्लौंगणनाथाय· द्वांद्वारश्रियै· ॐ दंयमायनमः रत्नसोपानपंक्तयेनमः तामा
रुह्य ऐंनमोभगवतिमाहेश्वरिपशुजनमनश्चक्षुस्तिरस्करणंकुरुकुरुस्वाहा तिरस्करिणीश्रीपादुकां
पूजयामिनमः इतिसंपूज्य पालितंवहिरिंद्राद्यैः परमैश्वर्यशोभितम् प्रपद्येपश्चिमंद्वारंभवान्यामंदिरम्
हृत इतिध्यात्वा पश्चिमद्वारायमणिमंडपायनमः इतिमंडपंसंपूज्य तालत्रयपूर्वंतद्द्वारमारुह्य ॐनीलं
त्वरंगमाधिरूढम्बुशोभमानानीलोत्पलकाभरणमाल्यविभूषणा — निद्रापटेनभुवनानितिरोदधाना
खड्गायुधाभगवतीपरिपातुचास्मात् ततःसिद्धार्थाक्षतादिनानाराचास्त्रयोगेन अपक्रामन्तुभूतानिपि
शाचाःप्रेतगुह्यकाः येचात्रनिवसंत्येस्मिदेवताभुविसंस्थिताः अपसर्पन्तुतेभूतायेभूताभुविसंस्थिताः ।
येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया इत्यस्त्रमंत्रमुच्चार्य मंडपांतःप्रोक्ष्य तस्मान्निर्गतानांविघ्नानां
स्ववामांगसंकोचेनमार्गंदत्वा पाषंडकारिणोभूताभूमौयेचांतरिक्षगाः दिविलोकेस्थितायेचतेनश्य
तुशिवाज्ञया इत्यंतेस्त्रेणवामपार्ष्णिघाततत्रयेणतालत्रयदानेनदिव्यदृष्ट्याच भौमांतरिक्षदिव्यान्विघ्नान्
त्सार्यवामपादपुरस्सरंमंडपांतःप्रविशेत् तत्रमंडपंप्रदीपमाल्यादिभिःसंभूष्य नैरृते ॐ वास्तुपुरुषाय
नमः ॐ ब्रह्मणेवास्त्वधीश्वरायनमः ॐ ईशाने ॐ श्रीकुलनाथश्री ॐ रक्तवर्णद्वादशशक्तिसहितश्री-

श्री॰ दीपनाथश्री इतिसंपूज्य अः फडितिपृष्ठावेदिंगत्वा ॐ अस्य श्री आसनशोधनमंत्रस्य मेरुपृष्ठऋषिः
सुतलंछंदः श्रीकूर्मोदेवता आंबीजं ह्रींशक्तिः क्रोंकीलकं आसनारोपणे विनियोगः मेरुपृष्ठऋषये
नमः शिरसि सुतलछंदसे नमो मुखे श्रीकूर्मदेवतायै नमः हृदि आंबीजाय नमः गुह्ये ह्रींशक्तये नमः।
पादयोः क्रोंकीलकाय नमः नाभौ आसनारोपणे विनियोगः सर्वांगेषु ॐ पृथ्वि त्वया धृता लोका देवि त्वं
विष्णुना धृता त्वं च धारय मां देवि पवित्रं कुरु चासनम् इति पृथ्वीं प्रार्थ्य ४ ह्रीं पृथिव्यै नमः जपस्यातेम्
लेनवीक्ष्यास्त्रेण प्रोक्ष्यास्त्रेणैव कुशैः स्त्रिः संताड्य कवचेनाभ्युक्ष्य ४ मंडूकाय नमः कालाग्निरुद्राय नमः
मूलप्रकृत्यै नमः पृथिव्यै सुधासमुद्राय मणिद्वीपाय चिंतामणिगृहाय रत्नवेदिकायै मणिपीठाय
शेषाय कमठाय पद्माय शतदलपद्मासनाय सहस्रदलपद्मासनाय ह्रीं आधारशक्तिकमलासना
य इति वेदिकान्तं संपूज्य तत्र यथोक्तमासनमासीर्य अस्त्रेण प्रोक्ष्य आसनाग्नेये ४ गं गणपतये नमः
नैऋते ४ दुं दुर्गायै नमः वायव्ये ४ सं सरस्वत्यै ईशाने ४ क्षं क्षेत्रपालाय इति संपूज्य तत्र पद्मासनेनो
पविश्य संविदं यथामंत्रं स्वीकुर्यात् ॐ संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे भैरवानां च तृप्त्यर्थं पवित्रा भ
व सर्वदा ॐ ब्रह्माण्यै नमः स्वाहा सिद्धमूले नयेदेवि हीनबोधप्रबोधिनि राजप्रजावशंकारि शत्रुपदा।
निसृदिति ऐंद्रियायै नमः स्वाहा अज्ञानेंधनदीप्ताग्ने ज्ञानाग्निब्रह्मरूपिणि आनंदस्याहुतिं प्रीतिं
सम्यक्ज्ञानं प्रयच्छ मे ह्रीं वैष्णव्यै नमः स्वाहा नमस्यामि नमस्यामि योगमार्गप्रदर्शिनि त्रैलोक्यविजये
मातः समाधिफलदा भव क्लीं मृडान्यै नमः स्वाहा ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतमाकर्ष

य २ सिद्धिं देहि २ श्रीदेवीपदं मे वश्यमानय २ स्वाहा आवाहनादिमुद्राः प्रदर्श्य मूलं आगच्छ २ संतिष्ठ २
सन्निधेहि २ सन्निरुध्यस्व २ संमुखीभव २ धेनुयोनी च प्रदर्श्य तत्तुपरि मूलं सप्तधा संजप्य छोटिकाभि
र्दशदिग्बंधनं विधाय स्वशिरसि श्रीगुरुपादुकामंत्रेण सप्तधा त्रिधा वा श्रीगुरुपरंपरां संतर्प्य श्रीदिव्यौघसि
द्धौघमानवौघश्रीपादुकां पूजयामि तर्पयामि नमः हृदि मूलेन श्रीमहात्रिपुरसुंदरी श्रीपादुकां तर्पयामि नमः
गणेशादिभैरवांतं संतर्प्य ऐं वद वद वाग्वादिनि क्लीं मम जिह्वाग्रे स्थिरी भव सौः सर्वसत्त्ववशंकरि स्वाहा ॥
इत्यनेन मुखं विशुद्धं कुर्यात् ततश्चानंदमयो भूत्वा शिवोहमिति भावयेत् रक्तवस्त्रानुलेपनाद्यलंकृतः तां हल
पूरितानन्तः श्रीगुरूपदिष्टविधिना श्रीचक्रं पुरतः स्वर्णासने संस्थाप्य मूलेन पुष्पांजलिं दत्त्वा स्ववामाग्रे
भूतेभ्यो नमः इति भूतबलिं दत्त्वा भूतानि यानीह वसंति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तम् अन्यत्र वा
सं परिकल्पयंतु दास्यंतु चान्यत्र नमोस्तु तेभ्यः इति भूतानि विसृज्य उत्तरे ओं नमो भगवते शलभशालाय
पक्षिराजाय मम शत्रून् नाशय २ हौं चच हुं फट् स्वाहा श्रीशलभरुद्र श्रीपादुकां पूजयामि नमः तद्वामे
ओं नमो भगवति शालभि शाल्विपक्षिराजे मम शत्रून् नाशय २ हुं फट् स्वाहा श्रीशलभदेवी श्रीपादु० ओं स
हस्रार हुं फट् श्रीमद्दर्शनाय नमः इति पूर्वदिशि ओं ह्रीं स्फुर २ प्रस्फुर २ घोर २ तनुरूप २ चट २ प्रचट २
कह २ वम २ बंध २ घातय २ हूं फट् अघोररुद्राय नमः इति दक्षिणे ओं उच्छिष्टपुरुषि किं स्वपिषि भयं मे
समुपस्थितं यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा श्रीदुर्गायै नमः इति पश्चिमे बहिः स्थाना
त्संपूज्य स्वदक्षे गंधादिपूजोपकरणानि निधाय वामे सुगंधजलकुंभं निधाय देवतायाः पश्चिमे कुलद्रव्या

श्री. ८
8

णमिति विधाय वक्ष्यमाणक्रमेण सामान्यार्घोदकेन पुष्पादिकं शोधयेद्यथा शताभिषेके शताभिषेके ह्रूं फट्
स्वाहा ॐ पुष्पकेतुराजाय शताय सम्यक्संगवद्धाय ह्रूं पुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्पसंभवे पुष्पप्रचया।
वकीर्णे ह्रूं फट् स्वाहा इति पुष्पाभिमंत्रणम् ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः फडिति स्मरन्नाराचमुद्रया दिव्यदृष्ट्या च पुष्पा
दिकं विलोक्य वामभागस्थं जलकुंभं श्रामिति वामहस्तेन च स्पृष्ट्वा स्रौं इति दक्षकरेण तत्स्थं जलं च स्पृष्ट्वा
रमिति दीपशिखां च स्पृष्ट्वा करौ प्रक्षाल्य वामे ऐं गुरुभ्यो नमः दक्षिणे गं गणपतये नमः अग्रे ४ श्रीपरदेव
तायै नमः इति प्रणम्य मूर्ध्नि संचहृन्मुद्रां विधाय ह्स्रैं सहक्षमलवयरां सहक्षमलवयऊं सहक्षमलवयरीं
ह्स्रौः श्रीपरपावक सर्वाराध्य मूर्ध्नि पुरनाथ सर्वगुरु स्वयंगुरु श्रीगुरुनाथ ह्स्सहक्षमलवयऊं ह्स्रौः सहक्ष
मलवयरीं सहक्षमलवयऊं सहक्षमलवयरां श्रीशंभुगुरु ह्स्रौः सहक्षमलवयऊं श्रीमच्छ्री प्रतापदेवको
लानंदनाथ श्रीपादुकां पूजयामि नमः इति शिरसि श्रीपादुकां विन्यस्य पुनरनयैव विद्यया गन्धादिना संपूज्य
गंधादि पंचमुद्राः प्रदर्श्य ॐ नमोऽस्तु गुरवे तस्मा इष्टदेवस्वरूपिणे यस्य वागमृतं हंति विषं संसारसंज्ञकम्
इति नमस्कारमुद्रया प्रणम्य ४ श्रें श्रीं सौंः इति करशुद्धिविद्यया करावन्योन्यमर्दनेन संशोध्य मध्यमयोः ४
श्रें नमः अनामयोः ४ श्रीं नमः कनिष्ठयोः ४ सौं नमः अंगुष्ठयोः श्रें नमः तर्जन्योः ४ श्रीं नमः करतलपृष्ठयोः ४
सौं नमः इति विन्यस्य ऐं ह्रीं सौंः नमस्त्रिपुरसुंदरि मां रक्ष २ इति मूर्धादिपादांतं त्रिर्व्यापकं विन्यस्य पुनर्हस्ता
र्भ्यां ऊर्ध्वोर्ध्वं तालत्रयं तर्जन्यंगुष्ठशब्देन दशदिग्बंधनं त्रिशूलाकारयोर्व्यस्तयोः करयोः स्वमूर्धांतपरितस्त्रि
र्भ्रामणेन वह्निप्राकारत्रयं विभाव्य प्राणायामत्रयं कृत्वा भूतशुद्धिं कुर्यात् पादादिजानुपर्यंतं पृथ्वीस्थानं

चतुरश्रं वज्रलांछितं पीतवर्णं ब्रह्मदेवतं निवृत्तिकलाधिष्ठितं लंबीजयुतं ध्यात्वा जान्वादिनाभिपर्यंतमपांस्थाने शुक्ल
वर्णमर्धचंद्राकारं स्पृगद्वयेपि पद्मलांछितं विष्णुदैवतं प्रतिष्ठाकलाधिष्ठितं वंबीजयुतं ध्यात्वा नाभ्यादिकंठपर्यंतं वह्नि
मंडलं स्वस्तिकोपेतं त्रिकोणाकारं रक्तवर्णं रुद्रदेवतं विद्याकलाधिष्ठितं रंबीजयुतं ध्यात्वा कंठादिभ्रूमध्यपर्यंतं वा
युमंडलं षट्कोणाकारं षड्बिंदुलांछितं धूम्रोपेतं कृष्णवर्णमीश्वरदेवतं शांतिकलाधिष्ठितं यंबीजयुतं ध्यात्वा भ्रूम
ध्यादिब्रह्मरंध्रांतमाकाशस्थाने वृत्ताकारं ध्वजलांछितं धूम्रवर्णं सदाशिवदेवतं शांत्यतीताकलाधिष्ठितं हंबीज
युतं ध्यात्वा तत्र पंचभूतमये देहे धर्मकंदसमुद्भूतं ज्ञाननालकमैश्वर्याष्टदलोपेतं परवैराग्यकर्णिकं स्वहृदयार
विंदं ध्यात्वा तत्कर्णिकायां जीवात्मानमांगुष्ठमात्रं प्रदीपकलिकाभास्वरमनादिमायासंछन्नं परचिद्रूपं संचिंत्य
प्राग्युक्तरूपेण मूलाधारात्कुंडलिनीं सुस्थाप्य सुषुम्णावर्त्मना मूलाद्यनाहतांतस्थवर्णवर्णाधिदेवताग्रस
नीं हृदयकमलमानीय तयाकवलीकृतं जीवात्मानं ध्यायन् सुषुम्णावर्त्मना विशुद्ध्याआदिचक्रस्थवर्ण
वर्णाधिदेवताग्रसंतीं ब्रह्मरंध्रं नीत्वा तत्रस्थितसहस्रदलकमलकर्णिकामध्यवर्तिनि परमात्मज्योतिषि ।
सवर्णवर्णदेवताकदंबकं जीवात्मानं हंस इति मंत्रेण संयोज्य कुंडलिनीं स्वस्थानमानीय तत्त्वसंहारं कुर्यात् ॥
तत्र पृथिवीस्थाने पादेंद्रियगमनक्रियागंतव्यगंधघ्राणपृथिवीब्रह्मनिवृत्तिसमानवायून् संस्मृत्य ह्लां ब्रह्मणे
पृथिव्यधिपतये निवृत्तिकलात्मने ॐ फट् स्वाहा इति मंत्रेण कुंडलिनीद्वारा अपां मध्ये संहरेत् ततोपांस्था
ने हस्तदानदातव्यरसरसनाजलविष्णुप्रतिष्ठोदानान् संचिंत्य ॐ ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्मने
ॐ फट् स्वाहा इति तां सर्वां कुंडलिनीद्वारा वह्निमध्ये संहरेत् ततो वह्निस्थाने पायुविसर्गविसर्जनीयरूपचक्षुर्व
ह्निरुद्रविद्याव्यानान् संस्मृत्य ॐ ह्रूं रुद्राय तेजोधिपतये विद्याकलात्मने ॐ फट् स्वाहा इति तां सर्वां वायुमंडले

श्री. ६
9

संहरेत् ततोवायुस्थाने उपस्थानंदनद्विषयस्पर्शस्प्रष्टव्यवाय्वीश्वरशांत्यपानान्संस्मृत्य ॐ हूं ईश्वरायवाय्व
धिपतयेशांतिकलात्मने ॐ फट्स्वाहा इतितांसर्वांताकाशस्थानेसंहरेत् ततआकाशस्थानेवाग्वचनवक्तव्य
शब्दश्रोत्राकाशसदाशिवशांत्यतीताप्राणान्संस्मृत्य ॐ ह्रौं सदाशिवायाकाशाधिपतयेशांत्यतीताकलात्मने
ॐ फट्स्वाहा इतितांसर्वांकुंडलिन्यांसंहृत्य तांबिंदुशक्तौ बिंदुशक्तिंनादशक्तौनादशक्तिम्परमशक्तौ पूर्वो
क्तपरमात्मनिसंयोज्यकेवलशरीरे वामकुक्षिस्थितंपापपुरुषंकज्जलप्रभं ब्रह्महत्याशिरस्कंचस्वर्णस्तेयभु
जद्वयं सुरापानहृदायुक्तंगुरुतल्पकटिद्वयं तत्संसर्गिपदद्वंद्वंसंगप्रत्यङ्गपातकंउपपातकरोमाणंरक्तश्म
श्रुविलोचनम् अधोमुखंकृष्णवर्णमंगुष्ठपरिमाणंकं खड्गचर्मधरंक्रुद्धंपापपुरुषंविचिंतयेत् इतिपापपु
रुषंविचिंत्यवामनासारंध्रेण यंबीजेनसहवायुमापूर्य नाभिस्थषट्कोणाकारेवायुमंडलेसंयोज्य तत्रय
मितिबीजंवायुंधूम्रवर्णंसंचिंत्यकुंभकेनयमितिबीजमावर्तयंस्तत्रस्थितेनमहावायुना स्वपापपुरुषंस्वश
रीरस्थंसंशोष्य वायुंदक्षिणनासयाविरेच्य पुनर्दक्षिणनासयारंबीजेनसहवायुमापूर्यमूलाधारेसंयोज्य।
तत्रस्थवह्निमंडले रमितिवह्निबीजं रक्तवर्णंविचिंत्य कुंभकेनरमितिबीजमावर्तयंस्तत्रस्थितमहावह्निनास्व
पापपुरुषंस्वशरीरस्थंसंदह्य पापपुरुषभस्मना सहितंवायुंवामनासयाविरेच्य पुनर्वामनासयावंबीजेनस
हवायुमापूर्य ब्रह्मरंध्रेसंयोज्य तत्रस्थचंद्रमंडले वमिति अमृतबीजंशुक्लवर्णंविचिंत्य कुंभकेनवंबीजमा
वर्तयंस्तत्रस्यामृतधारया स्वदेहभस्मप्लुतंविभाव्य तंवायुंदक्षनासयाविरेच्य पुनर्दक्षनासयालंबीजेनवायु
मापूर्य मूलाधारस्थपार्थिवमंडलेसंयोज्य तत्रलमितिपृथ्वीबीजं पीतवर्णंसंचिंत्य कुंभकेनलंबीजमावर्तयं
स्तत्रस्थेनतेजसामृतप्लावितभस्मघनीकृत्य तंवायुंवामनासयाविरेच्य पुनर्वामनासयामायाबीजेनवायुमा

पूर्वं मूलाधारस्थविंदुमध्ये मायाबीजं स्फुरद्बालार्कवर्णं संचिंत्य कुंभकेन वायुमावर्तयंस्तेन करचरणाद्यव
यवसमेतं स्वदेहं निष्पन्नं विभाव्य तं वायुं दक्षनासया विरेचयेत् इति स्थूलशरीरं निष्पाद्य सूक्ष्मशरीरं निष्पा
दयेत् तत्र पूर्वोक्तसहस्रारकमलस्थपरमात्मनः सकाशात्सकलजगत्सिसृक्षाविजृंभितपरब्रह्मेच्छारू
पिणीं परशक्तिं ॐ ह्रीं नमः इति स्वस्थानमानीय ततो नादशक्तिं ततो विंदुशक्तिं प्रणवेन सृष्ट्वा विंदुशक्तेः स
काशात्सकलजगत्सृष्टिहेतुभूतां कुंडलिनीं प्रणवेन निःसार्य ततः ॐ ह्रौं सदाशिवायाकाशाधिपतये शांत्य
तीताकलात्मने नमः इति शांत्यतीतां सदाशिवाकाशश्रोत्रवक्तव्यवचनवाच आकाशस्थाने स्थापयेत्।
ततः आकाशमंडलात् ॐ हूं ईश्वराय वाय्वधिपतये शांतिकलात्मने नमः इत्यपानशांतीश्वरवायुस्पर्शस्पृष्ट
व्यतद्विषयानंदोपस्थां वायुस्थाने स्थापयेत् ततः ॐ हूं रुद्राय तेजोधिपतये विद्याकलात्मने नमः इति व्यानवि
द्यारुद्रतेजश्चक्षूरूपविसर्जनीयविसर्गपायूंतमग्निस्थाने स्थापयेत् ततः ॐ ह्रीं विष्णवे जलाधिपतये प्रतिष्ठा
कलात्मने नमः इत्युदानप्रतिष्ठाविष्णुजलरसनारसदानव्यदानहस्तानपां स्थाने स्थापयेत् ततः ॐ ह्रीं ब्रह्मणे
पृथिव्यधिपतये निवृत्तिकलात्मने नमः इति समाननिवृत्तिब्रह्मपृथिवीघ्राणगंधगंतव्यगमनक्रियापादेंद्रिया
णि पृथिवीस्थाने स्थापयेत् ततः प्रणवेन कुंडलिनीं स्वस्थाने स्थापयित्वा नादशक्तिं विंदुशक्तिं परमशक्तीं तां
प्रणवेन स्वदेहे व्याप्तिं विभाव्य सोहमिति मंत्रेण ब्रह्मरंध्रस्थपरमात्मनः सकाशात्कुंडलिनीं जीवात्मानं च
संसृत वर्णवर्णाधिदेवतासहितमाज्ञादिचक्रेषु तत्तद्वर्णवर्णाधिदेवताः स्थापयन् हृदयकमलमानीय हृदय
कमले जीवात्मानं स्थापयित्वा कुंडलिनीं सुषुम्णामार्गेण मणिपूरकादिचक्रेषु तत्तद्वर्णवर्णाधिदेवताः स्था
पयन्मूलाधारे स्थापयेत् ततः स्वशरीरं निर्मलसकलकल्मषं देवताराधनयोग्यं विभाव्य प्राणप्रतिष्ठां कुर्यात्

श्री. या ॐ अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुशिवा ऋषयः ऋग्यजुःसामानि छंदांसि पराप्राणशक्तिर्देव
१० ता आंबीजं ह्रींशक्तिः क्रोंकीलकं मम श्रीप्राणप्रतिष्ठार्थे विनियोगः इति कृतांजलिः स्मृत्वा न्यसेत् ब्रह्मवि
ष्णुशिवेभ्यो ऋषिभ्यो नमः शिरसि ऋग्यजुःसामभ्यः छंदोभ्यो नमो मुखे पराप्राणशक्तिदेवतायै नमः हृदये
आंबीजाय नमः गुह्ये ह्रींशक्तये नमः पादयोः क्रोंकीलकाय नमः नाभौ मम श्रीप्राणप्रतिष्ठार्थे विनियोगः
इति सर्वांगे ततः ॐ आं ह्रीं क्रों अं कं खं गं घं ङं आकाशवाय्वग्निसलिलपृथिव्यात्मने आं अंगुष्ठाभ्यां नमः ४
इं चं छं जं झं ञं शब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यां स्वाहा ४ उं टं ठं डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्म
ने ऊं मध्यमाभ्यां वषट् ४ एं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां हुं ४ ओं पं फं बं भं मं वचा
नादानविसर्गगमनानंदात्मने औं कनिष्ठिकाभ्यां वौषट् ४ अं यं रं लं वं शं षं सं हं लं क्षं मनोबुद्ध्यहंकार
चित्तात्मने अः करतलपृष्ठाभ्यां फट् एवं षडंगन्यासः ततो ध्यानं ॐ रक्ताब्धिपोतारुणपद्मसंस्थां पाशांकुशा
विक्षुशरासबाणान् शूलं कपालं दधतीं कराब्जै रक्तां त्रिनेत्रां प्रणमामि देवीम् इति ध्यात्वा हृदि हस्तं निधाय
ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हौं हंसः सोहं श्रीत्रिपुरसुंदरीभगवत्याः प्राणा इह प्राणाः ३ जीव इह स्थितः ३
श्रीकामेश्वरशिववपुतश्रीमहात्रिपुरसुंदर्याः सर्वेंद्रियाणि इह स्थितानि ३ वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्रा
णप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इति प्राणप्रतिष्ठां त्रिः सकृद्वा जप्त्वा निजवपुर्ज्योतिर्मयं ध्यायेत् इति
प्राणप्रतिष्ठा अथांतर्मातृकान्यासः तत्र स्वरैः पूरकः कादिमांतैः कुंभकः यादिभी रेचकः इति मातृकाप्राणा
यामं कृत्वा संकल्पं कुर्यात् ॐ अस्य श्रीअंतर्मातृकान्यासस्य श्रीब्रह्मा ऋषिः गायत्रं छंदः श्रीअंतर्मातृकासरस्व
ती देवता हलो बीजानि स्वराः शक्तयः अव्यक्तं कीलकं मम श्रीमहात्रिपुरांगत्वेन न्यासे विनियोगः इति प्रांज

10

लिः समस्तव्यान्यसेत् श्रीब्रह्मऋषये नमः शिरसि गायत्रीछंदसे नमः मुखे श्रीअंतर्मातृकासरस्वतीदे
वतायै नमः हृदि हल्भ्यो बीजेभ्यो नमः गुह्ये स्वरशक्तिभ्यो नमः पादयोः अव्यक्तकीलकाय नमः ना
भौ मम श्रीत्रिपुरसुंदर्यंगत्वेन न्यासे विनियोगः सर्वांगेषु इति ऋष्यादिन्यासः अथ करन्यासः ॐ ऐं
ह्रीं श्रीं अं कं ५ आं अंगुष्ठाभ्यां नमः ५ इं चं ५ ईं तर्जनीभ्यां स्वाहा ५ उं टं ५ ऊं मध्यमाभ्यां वषट् एं तं ५
ऐं अनामिकाभ्यां हुं ५ ओं पं ५ औं कनिष्ठिकाभ्यां वौषट् ५ अं यं ५ अः करतलपृष्ठाभ्यां फट् इति क
रन्यासः एवं षट् ॐ ध्यामेहरसनार्णकर्णिकमचांहं हेः स्फुरत्केसरं पत्रांतर्गतपंचवर्गयशलार्णादि
त्रिवर्गक्रमात् आशास्वश्रिषु लांतलांगलिपुजाद्योणीपुरे राज्यहृते वर्णाब्जे शिरसि स्थिते विषमदप्र
ध्वंसि मृत्युंजयं इति वर्णकमले शिरसि ध्यात्वा मूलाधारस्थ निष्क्रम्य प्रबुद्धपशाशिकुंडली ज्वलत्पा
वकसंकाशां सूक्ष्मतेजः स्वरूपिणी मूलाधाराच्छिरः पद्मे स्पृशंती विद्युदाकृतिं तयास्पृष्टशिरःपा
मादमृतौघस्वरूपिणः निर्गतान्मातृकावर्णान् ब्रह्ममार्गवर्त्मना तत्वे व्यापयित्वा स्थितान् सर्वानेवं ध्या
त्वा प्रविन्यसेत् अं नमः आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः नमः कंठे षोडशदले कं नमः खंगंघं
ङं चं छं जं झं ञं टं ठं नमः अनाहते द्वादशदले ॥ डं नमः ढं नमः णं नमः तं नमः थं नमः दं नमः धं न
मः नं नमः पं नमः फं नमः नाभौ दशदले बं नमः भं मं यं रं लं नमः लिंगमूले षड्दले वं नमः शं षं सं
नमः मूलाधारे चतुर्दले हं नमः क्षं नमः भ्रूमध्ये द्विदले इत्यंतर्मातृकान्यासः अथ बहिर्मातृकान्या
सः तत्र ऋष्यादिकमंतर्मातृकावदेव ध्यानं यथा ॐ पंचाशद्वर्णभेदैर्विहितवदनदोःपादहृत्कुक्षि

श्री॰
११

वक्त्रोदेशांभास्वत्कपर्दीकलितशशिकलामिंदुकुंदावदातां अक्षस्रक्कुंभचिंतालिखितवरकरांत्रीक्ष
णांपद्मसंस्थामच्छाकल्पामतुच्छस्तनजघनभरांभारतींतांनमामि इतिध्यात्वा ह्सौं अं आं इत्यादिक्ष
मित्यंते ह्सौः इतिमूर्धादिपादांतंविन्यस्य ॐऐंह्रींश्रींअंनमः शिरसि ॐ आंनमः मुखवृत्ते ॐ इंनमः दक्ष
नेत्रे ॐ ईंनमः वामे ॐ उंनमः दक्षकर्णे ॐ ऊंनमः वामे ॐ ऋंनमः दक्षनसि ॐ ॠंनमः वामे ॐ ऌंन
मः दक्षगंडे ॐ ॡंनमः वामे ॐ एंनमः ऊर्ध्वोष्ठे ॐ ऐंनमः अधरे ॐ ओंनमः ऊर्ध्वदंतपंक्तौ ॐ औंनमः अ
धोदंतपंक्तौ ॐ अंनमः ललाटे ॐ अःनमः जिह्वायां ॐ कंनमः दक्षबाहुमूले ॐ खंनमः कुर्परे ॐ
गंनमः मणिबंधे ॐ घंनमः अंगुलिमूले ॐ ङंनमः अंगुल्यग्रे ॐ चंनमः वामबाहुमूले ॐ छंनमः कु
र्परे ॐ जंनमः मणिबंधे ॐ झंनमः अंगुलिमूले ॐ ञंनमः अंगुल्यग्रे ॐ टंनमः दक्षपादकक्षे ॐ ठंनमः
जानुनि ॐ डंनमः गुल्फे ॐ ढंनमः अंगुलिमूले ॐ णंनमः अंगुल्यग्रे ॐ तंनमः वामपादकक्षे ॐ
थंनमः जानुनि ॐ दंनमः गुल्फे ॐ धंनमः अंगुलिमूले ॐ नंनमः अंगुल्यग्रे ॐ पंनमः दक्षपार्श्वे ॐ
फंनमः वामे ॐ बंनमः पृष्ठे ॐ भंनमः नाभौ ॐ मंनमः जठरे ॐ यंत्वगात्मनेनमः हृदि ॐ रंअसृगात्म
नेनमः दक्षांसे ॐ लंमांसात्मनेनमः ककुदि ॐ वंमेदसात्मनेनमः वामांसे ॐ शंअस्थ्यात्मनेनमः ।
षंमज्जात्मनेनमः हृदादिवामपाण्यंतम् ॐ संशुक्रात्मनेनमः हृदादिदक्षपादांतं ॐ हंप्राणात्मनेन
मः हृदादिवामपादांते ॐ लंजीवात्मनेनमः पादादिनाभ्यंते क्षंः परमात्मनेनमः नाभ्यादिमूर्धांते ॥
इतिशुद्धमातृकान्यासः अथषोढान्यासः तत्र ॐ अस्यश्रीषोढान्यासस्यश्रीदक्षिणामूर्तिर्ऋषिः पंक्ति

छंदः श्रीमातृकात्रिपुरीदेवता ऐंबीजं सौंशक्तिः क्लींकीलकं श्रीविद्यांगत्वेन न्यासे विनियोगः इति स्मृ
त्वा विन्यस्य करांगन्यासं कुर्यात् ॐ अं कं ऐं आं एं अंगु· म· इं ॐ चं ऐं ईं क्लीं तर्ज· शिर।ॐ उं टं ऐं ऊं सौंः
मध्य· शिखा· ॐ एं तं ऐं ऐं ऐं अना॥ कव·।ॐ ओं पं ऐं औं क्लीं कनि· नेत्रत्र·।ॐ अं यं ऐं अः सौंः करत
ल· अस्त्राय फट् इति षडंगन्यासं विधाय ध्यानं ॐ उद्यत्सूर्यसहस्राभां पीनोन्नतपयोधराम् रक्तमा
ल्यांबरालेपरक्तभूषणभूषितां पाशांकुशधनुर्बाणभास्वत्पाणिचतुष्टयां लसन्नेत्रत्रयां स्वर्णमु
कुटोद्भासिचंद्रिकां गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीं देवीं पीठमयीं ध्यायेन्मातृकां सुंदरीं परां
इति ध्यात्वा परानंदोद्यतो मम मूर्तिरूपेण ध्यात्वा॥ ॐ तरुणादित्यसंकाशान् गजवक्त्रान् त्रिलोचनान् पा
शांकुशवराभी करान् शक्तिसमन्वितान् तास्तु सिंदूरवर्णाभाः सर्वालंकारभूषिताः एकहस्तधृतां
भोजाश्चतुरालिंगितप्रियाः इति ध्यात्वा न्यसेत् ॐ अं· विघ्नेश्वराय श्रियै नमः शिरसि।ॐ आं विघ्नराजा
य ह्रियै नमः मुखवृत्ते।ॐ इं विनायकाय तुष्ट्यै नमः दक्षनेत्रे ॐ ईं शिवोत्तमाय शान्त्यै नमः वामे ॐ उं वि
घ्नकृते पुष्ट्यै नमः दक्षकर्णे ॐ ऊं विघ्नहर्त्रे सरस्वत्यै नमः वामे ॐ ऋं विघ्नराजे रत्यै नमः दक्षनासि ॐ ॠं ग
णनाथाय मेधायै वामनासायां ॐ लृं एकदंताय कान्त्यै नमः दक्षगंडे ॐ लॄं द्विदंताय कामिन्यै वामे ॐ एं गजवक्त्रा
य मोहिन्यै ऊर्ध्वोष्ठे ॐ ऐं निरंजनाय जटायै अधरे ॐ ओं कपर्दिने तीव्रायै ऊर्ध्वदंतेषु ॐ औं दीर्घवक्त्राय
ज्वालिन्यै नमः अधोदंतेषु ॐ अं शंकुकर्णाय नंदायै शिरसि ॐ अः वृषध्वजाय रमायै नमः चिबुके ॐ कं ललाटे
गणनाथाय रूपिण्यै नमः दक्षबाहुमूले ॐ खं गजेंद्राय मद्रायै कूर्परे ॐ गं शूर्पकर्णाय जयिन्यै मणि
बंधे ॐ घं त्रिनेत्राय सत्यायै अंगुलिमूले ॐ ङं लंबोदराय विघ्नेशायै अंगुल्यग्रे ॐ चं महानादाय स्व जिह्वायां

श्री· शूर्पिण्ये वामबाहुमूले ॐ छं चतुर्मूर्तये कामदायै कूर्परे ॐ जं सदाशिवाय मदविह्वलायै मणिबं
१२ धे ॐ झं आमोदाय विकटायै अङ्गुलिमूले ॐ ञं दुर्मुखाय घूर्णायै अङ्गुल्यग्रे ॐ टं सुमुखाय भूत्यै
12 दक्षपादकक्षे ॐ ठं प्रमोदाय भूम्यै जानुनि ॐ डं एकपादाय सत्यै गुल्फे ॐ ढं द्विजिह्वाय रमायै अ
ङ्गुलिमूले ॐ णं शूराय मानुष्यै नमः अङ्गुल्यग्रे ॐ तं वीराय मकरध्वजायै वामपादकक्षे ॐ थं ष
ण्मुखाय विकलायै नमः जानुनि ॐ दं वरदाय भ्रूकुट्यै नमः गुल्फे ॐ धं वामदेवाय लज्जायै।
अङ्गुलिमूले ॐ नं वक्रतुण्डाय दीर्घघोणायै अङ्गुल्यग्रे ॐ पं द्विरण्डाय धनुर्धरायै नमः दक्षपार्श्वे ॐ
फं सेनान्ये ग्रामिण्यै वामे ॐ बं ग्रामण्ये पराक्ष्यै पृष्ठे ॐ भं मत्ताय चंद्रिकायै नाभौ ॐ मं विमलाय शशिप्र
भायै उदरे ॐ यं मत्तवाहनाय लोलायै नमः हृदि ॐ रं जटिने चंचलाक्ष्यै दक्षांसे ॐ लं मुंडिने ज्व ॐ
ह्यै नमः ककुदि ॐ वं खड्गिने दुर्भगायै वामांसे ॐ शं वरेण्याय सुभगायै नमः हृदादिदक्षपाण्यंते
षं वृषकेतवे शिवायै हृदादिवामपाण्यंते ॐ सं भक्तप्रियाय दुर्गायै हृदादिदक्षपादांते ॐ हं मे
घनादाय कालिकायै हृदादिवामपादांते ॐ लं गणपतये कालजिह्वायै पादादिनाभ्यंते ॐ क्षं
गणेशाय विघ्नहारिण्यै नमः नाभ्यादिमूर्धांते इति मातृकास्थानेषु न्यसेत् इति गणेशन्यासः १
अथ ग्रहन्यासः रक्तं श्वेतं तथा रक्तं श्यामं पीतं च पांडुरं धूम्रं कृष्णं कृष्णधूम्रं धूम्रधूम्रं विचिंतये
त् रविमुख्यान् कामरूपान् सर्वाभरणभूषितान् वामोरुन्यस्तहस्तांश्च दक्षहस्तवरप्रदान् शा
क्त्योपेतान् ध्यायेद्वराभयकरांबुजाः स्वस्वप्रियांकनिलयाः सर्वाभरणभूषिताः इति ध्यात्वा
न्यसेत् हृदयाधस्तात् ॐ अं ऐं सूर्याय रेणुकांतायै नमः भ्रूमध्ये यं ॐ चंद्राय अमृतांवायै

नेत्रत्रये ॐ कं ॐ मंगलायाथामोबायेहृदयस्योपरि ॐ चं ॐ बुधाययज्ञानरूपांबायेकंठे ॐ
टं ॐ बृहस्पतयेयशस्विन्यंबायेनमः स्तनमध्ये ॐ तं ॐ शुक्रायशाकंवर्यंबायेनाभौ ॐ पं ॐ शनै
श्चरायशकुन्यंबायेमुखे ॐ षं संहं राहवेकृत्स्नांबायेपादयोः ॐ लंक्षंः केतवेधूम्रांबायेनमः इति
ग्रहन्यासः अथनक्षत्रन्यासः ज्वलत्कालाग्निसंकाशा वरदाभयपाणयः नतिपाण्ये। अश्विनीमु
ख्याः सर्वाभरणभूषिताः इतिध्यात्वान्यसेत् ॐ ललाटे अंआं अश्विन्यैनमः दक्षनेत्रे ॐ इंईं भर
ण्यैनमः वामे ॐ उंऊं कृत्तिकायैनमः दक्षकर्णे ॐ ऋंॠंलृंलॄं रोहिण्यैवामे ॐ एं मृगशिरसेन
मः दक्षनासे ॐ ऐं आर्द्रायैवामायां ॐ ओंऔं पुनर्वसवेकंठे ॐ कं पुष्यायदक्षस्कंधे ॐ खंगं आश्ले
षायैवामे ॐ घंङं मघायैदक्षपार्श्वे ॐ चं पूर्वाफाल्गुण्यैनमः वामे ॐ छंजं उत्तराफल्गुण्यैनमः
दक्षमणिबंधे ॐ झंञं हस्तायवामे ॐ टंठं चित्रायै दक्षस्तने ॐ डं स्वात्यैवामे ॐ ढंणं विशाखायै
नाभौ ॐ तंथंदं अनुराधायैदक्षकट्यां ॐ धंनं ज्येष्ठायैवामायां ॐ पंफं मूलायैदक्षोरौ ॐ बं पूर्वा
षाढायैवामोरौ ॐ भं उत्तराषाढायैदक्षजानुनि ॐ मं श्रवणायवामे ॐ यंरं धनिष्ठायैदक्षजंघायां ॐ
लं शतभिषजेवामायां ॐ वंशं पूर्वभाद्रपदायैदक्षपादे ॐ षंसंहं उत्तरभाद्रपदायैवामे ॐ लंक्षं
अंअः रेवत्यैनमः इतिनक्षत्रन्यासः अथमहायोगिनीन्यासः ॐ तत्रविशुद्धौषोडशदले ओंरक्तां
रक्तत्रिनेत्रांपशुजनभयकृत्कूलखट्वांगहस्तां वामेखेटं दधानांचषकमपिसुरापूरितंचैकव।
क्त्रां आस्यग्रामग्रदंष्ट्रामरिकुलमथनींपापसान्तेप्रसक्तां कंठस्थानेस्मरेत्ताद्यैः परिहृतवपुषंभा

वपेडाकिनीतां इतिध्यात्वान्यसेत् ॐ डांडींडूंडैंडौंडः डमलवरयऊं डाकिनिमां रक्ष रक्ष ममत्व
ग्धातुं रक्ष रक्ष सर्वसत्ववशंकरि देवि आगच्छ २ इमां पूजां गृह्ण २ पेंचौरे देवि ह्रीं सः परमचौरे ह्रूं चो
रत्नरूपेण हि २ नमस्त्रामंडे डरलकसहैं श्रीमहात्रिपुरसुंदरि देवि विवरदे विच्चे अंआंइंईंउंऊंऋंॠं
लृंलॄंएंऐंओंऔंअंअः विशुद्धपीठस्थे विशुद्धडाकिनि विशुद्धनाथदेवश्रीपादुकां पूजयामि नमः
इत्यंगुष्ठानामिकाभ्यां कर्णिकायां विन्यस्य तदग्रादि परितस्तदावरणशक्तीर्न्यसेत् ॐ अंअमृता
यै नमः आंआकर्षिण्यै नमः इंइंद्राण्यै नमः ईंईशान्यै नमः उंउमायै नमः ऊंऊर्ध्वकेशिन्यै नमः
ऋंऋद्धिदायै नमः ॠंॠषायै नमः लृंलृकारायै लॄंलॄषायै एंएकपादायै ॐ ऐंऐश्वर्यात्मिका
यै० ॐ ओंओंकारात्मिकायै· ॐ औंऔषध्यात्मिकायै· ॐ अंअम्बिकायै· ॐ अः अक्षरात्मिका· ओंश्री
मोमूलादाहसंताडमरकसहितं तीव्रणचक्रे वहंती — स्यां रक्तत्रितेत्राभ्रकटिवलिलसद्देहदंतप्र
भाभिः दीप्तास्यां देवदेवी हृदयकमलगां रक्तयात्वेकताथां शुद्धां त्वेषप्रसत्रामलिमदरुदितां चिं
तयेराकिनीतां ॐ रांरींरूंरैंरौंरः रमलवयऊं राकिनिमां रक्ष २ ममरक्तधातुं रक्ष २ सर्वसत्ववशं
करि देवि आगच्छ २ इमां पूजां गृह्ण २ पेंचौरि देवि ह्रीं सः परमचौरे — — हूंचोरत्नरूपेण हि २ नम
स्त्रामंडे डरलकसहैं श्रीमहात्रिपुरसुंदरि देवि विवरदे विच्चे कंखंगंघंङं· चंछंजंझंञंटंठं अनाह
तपीठस्थे अनाहतराकिणि अनाहतनाथदेवश्रीपादुकां पूजयामि नमः इतिन्यस्य दलेषु परित
स्तदावरणदेवतान्यसेत् ॐ कंकालरात्र्यै नमः ॐ खंखातीतायै नमः ॐ गंगायत्र्यै नमः ॐ घंघंटा

धारिण्यैनमः ॐ डं डार्णात्मिकायैनमः ॐ चं चामुण्डायैनमः ॐ छं छायायैनमः ॐ जं जयायैन
मः ॐ झं झंकारिण्यैनमः ॐ ञं ञार्णात्मिकायै ॐ टं टंकहस्तायै ॐ ठं ठंकारिण्यै इति राकिणीव
द्ध्यात्वान्यसेत् २ ततो मणिपूरके दशदलकमले ॐ हूंल्लं देवी त्रिवक्त्रां त्रिनयनलसितां दंष्ट्रिणीमु
ग्ररूपां वज्रं शक्तिं च दंडाभयवरदहस्तान् दधतीं वामे दधानां ध्यात्वा नाभिस्थपद्मे दशदलविलसत्क
र्णिके लाकिनीं तां मांसमध्यां गौडभक्तोत्सुकहृदयवतीं विन्यसेत्साधकेन्द्रः इति ध्यात्वा ॐ लां लीं लूं
लैं लौं लः लमलवरयूं लाकिनि मां रक्ष रक्ष मम मांसधातुं रक्ष २ सर्वसत्ववशंकरि देवि आगच्छ २
इमां पूजां गृह्ण २ ऐं घोरे देवि ह्रीं सः परमघोरे हूं घोररूपे एहि २ नमश्चामुंडे डरलकसहैं श्रीमहात्रि
पुरसुंदरि देवि वरदे विच्चे डं ढं णं तं थं दं धं नं पं फं मणिपूरकपीठस्थे मणिपूरकलाकिनि मणिपूर
कनाथदेवश्रीपा·पू· इति कर्णिकायां विन्यस्य परितस्तद्दलदेवता लाकिनीवद्ध्यात्वा न्यसेत् ॐ डं
डामर्यै ॐ ढं ढंकारिण्यै ॐ णं णंकारिण्यै ॐ तं तामस्यै ॐ थं स्थानदेव्यै ॐ दं दाक्षायिण्यै ॐ धं धात्र्यै ॐ
नं नंदायै ॐ पं पार्वत्यै ॐ फं फेत्कारिण्यै इति ततः स्वाधिष्ठाने षड्दलकमले ॐ स्वाधिष्ठानाख्यपद्मे
रसदललसिते वेदवक्त्रां त्रिनेत्रां पीताभां धारयंतीं त्रिशिखगुणकपालाभयान्यात्तगर्वाम् मेदोधातु
प्रतिष्ठामलिमदमुदितां बंधिनीत्यादिवीतां दध्यन्ने सक्तचित्तामभिमतफलदां काकिनीं भावयेता
म् इति कर्णिकायां ध्यात्वा तन्मंत्रं न्यसेत् ॐ कां कीं कूं कैं कौं कः कमलवरयूं काकिनि मां रक्ष रक्ष।
मम मेदोधातुं रक्ष रक्ष २ सर्वसत्ववशंकरि देवि आगच्छ २ इमां पूजां गृह्ण २ ऐं घोरे देवि ह्रीं सः पर

श्री· मचौरि हूं चोररूपेण एहि २ नमस्त्रामंडेडरलकसहैं श्रीमहात्रिपुरसुंदरि वरदेविच्चे वंभं मं यं रं लं स्वाधि
१५ ष्ठानपीठस्थे स्वाधिष्ठानकाकिनि स्वाधिष्ठाननाथदेवश्रीपादुकां पूजयामि नमः इति विन्यस्य परि
तस्तद्दलेषु परिवारदेवतान्यसेत् वं वंधिन्यै नमः ॐ भं भद्रकाल्यै नमः ॐ मं महामायायै नमः ॐ
यं यशस्विन्यै नमः ॐ रं रमायै नमः ॐ लं लंवोष्ठ्यै नमः ॐ इति काकिनीं ध्यात्वा न्यसेत् ॐ मूला
धारे चतुर्दलकमलकर्णिकायां ॐ देवीं ज्योतिःस्वरूपां त्रिनयनविलसत्पंचवक्त्रां सुदंष्ट्रां हस्तांभो
जैस्त्वचापं स्रणिमपिदधतीं पुस्तकं ज्ञानमुद्रां मूलाधारस्थपद्मे निखिलपशुजनोन्मादिनीमस्थि
संस्थां मज्ज्ञानप्रीतियुक्तां मधुमदमुदितां चिंतयेच्छाकिनीं तां ॥ इति ध्यात्वा ॐ सां सीं सूं सैं सौं सः ।
समलवरयूं शाकिनि मां रक्ष २ ममास्थिधातुं रक्ष २ सर्वसत्ववशंकरि देवि आगच्छ २ इमां पूजां
गृह्ण २ पेचौरे देवि ह्रीं सः परमचौरे हूं चोररूपेण एहि २ नमस्त्रामंडेडरलकसहैं श्रीमहात्रिपुरसुं
दरि देवि वरदे विच्चे वं शं षं सं मूलाधारपीठस्थे मूलाधारशाकिनि मूलाधारनाथदेवश्रीपादुकां पू
जयामि नमः इति विन्यस्य तद्दलेषु तत्परिवारदेवतास्तद्ध्यात्वा न्यसेत् ॐ वं वरदायै ॐ शं श्रियै ॐ
षं षंडायै ॐ सं सरस्वत्यै इति ततो भ्रूमध्ये आज्ञाचक्रकर्णिकायां भ्रूमध्ये विंदुपद्मे द्विदलसुललि
ते शुक्लवर्णां कराब्जैर्विभ्राणां ज्ञानमुद्रां डमरुकसहितामक्षमालां कपालं षड्वक्त्रां मज्जसंस्थां
त्रिनयनलसितां हंसवत्यादियुक्तां हारिद्रान्ने प्रसक्तां सकलसुरनुतां हाकिनीं भावयेत्तां इति ध्या
त्वा ॐ हां हीं हूं हैं हौं हः हमलवरयूं हाकिनि मां रक्ष रक्ष २ मम मज्जाधातुं रक्ष २ सर्वसत्ववशं

करिदेविआगच्छ २ इमांपूजांगृह्ण २ ऐंघोरेदेविह्रींसः परमघोरेहूंघोररूपे एहिएहिनमश्चामुं
डेडरलकसहैं श्रीमहात्रिपुरसुंदरिदेविवरदेविच्चे हंसः आज्ञाचक्रपीठस्थे आज्ञाहाकिनि आज्ञा।
नाथदेवश्रीपादुकांपूजयामि इतिविन्यस्य तद्दलयोः ॐ हंहंसवर्णायैनमः ॐ क्षंःक्षमावर्णायैनमः
इतिहाकिनिवद्ध्यात्वान्यसेत् ततोब्रह्मरंध्रेसहस्रारकर्णिकायां ॐमंडलोमासनस्थेसकलद
लयुतेयाकिनींभैरवींतां यदिणिपायांसमस्तायुधललितकरांसर्ववर्णैसमष्टिं डा नांसर्वव
र्णांसकलसृष्टिकरींसर्वथातत्स्वरूपांसर्वान्तेसमस्तचित्तापरशिवरश्मिकांभावयेत्सर्वरूपाम् ॥
इतिध्यात्वा ॐ यांयींयूंयैंयौंयः यमलवरयूं याकिनिमांरक्षरक्षममसृकादिसर्वथातत्त्वरत
सर्वसत्ववशंकरिदेविआगच्छ २ इमांपूजांगृह्ण २ ऐंघोरेदेविह्रींसः परमघोरेहूंघोररूपेए
हि २ नमश्चामुंडेडरलकसहैं श्रीमहात्रिपुरसुंदरिदेविवरदेविच्चे अंआंइंईंउंऊंऋंॠंलृंॡं
एंऐंओंऔंअंअः कंखंगंघंङं चंछंजंझंञं टंठंडंढंणं तंथंदंधंनं पंफंबंभंमं यंरंलंवंशंषंसंहंलं
क्षंः ब्रह्मरंध्रपीठस्थेब्रह्मरंध्रयाकिनिब्रह्मरंध्रनाथदेवश्रीपादुकांपूजयामिनमः इतिविन्यस्य
परितः पंचाशद्वर्णदेवतायाकिनीवद्ध्यात्वान्यसेत् ॐ अंअमृतायैनमः ॐ आंआकर्षिण्यैनमः ॐ
इंइंद्राण्यैनमः ॐ ईंईशान्यैनमः ॐ उंउमायैनमः ऊंऊर्ध्वकेश्यै ॐ ऋंऋद्धिदायै ॐ ॠंॠषायै ॐ
लृंलृकारात्मिकायै ॐ ॡंॡषायै ॐ एंएकपादायै ॐ ऐंऐश्वर्यात्मिकायै ॐ ओंओंकारात्मिका
यै ॐ औंऔषधात्मिकायै ॐ अंअंविकायै ॐ अः अक्षरात्मिकायै ॐ कंकालरात्र्यै ॐ खंखाती

श्री॰
१५
15

तायै ॐ गंगायत्र्यै ॐ चंचंटाधारिण्यै ॐ ङंङात्मिकायै ॐ चंचामुण्डायै ॐ छंछायायै
ॐ जंजयायै ॐ झंझंकारिण्यै ॐ ञंञात्मिकायै ॐ टंटंकहस्तायै ॐ ठंठंकारिण्यै ॐ
डंडामर्यै ॐ ढंढंकारिण्यै ॐ णंणंकारिण्यै ॐ तंतामस्यै ॐ थंस्थानदेव्यै ॐ दंदाक्षायिण्यै ॐ
धंधात्र्यै ॐ नंनंदायै ॐ पंपार्वत्यै ॐ फंफेत्कारिण्यै ॐ बंबंधिन्यै ॐ भंभद्रकाल्यै ॐ मंम
हामायायै ॐ यंयशस्विन्यै ॐ रंरमायै ॐ लंलंबोष्ठ्यै ॐ वंवरदायै ॐ शंशशिन्यै ॐ षंषोढा
यै ॐ संसरस्वत्यै ॐ हंहंसवत्यै ॐ क्षंक्षमावत्यै इतिन्यसेत् इतिमहायोगिनीन्यासः अथराशि
न्यासः रक्तेश्वेतेहरिद्वर्णपांडुचित्रेसितेस्मरेत् पिशंगपिंगलोवभ्रुकर्द्वरौसितधूम्रको इति।
ध्यात्वा दक्षगुल्फे अंआंइंईंमेषायनमः दक्षजान्वुनि उंऊंवृषायनमः दक्षवृषणे ऋंॠंलृं
ॡंमिथुनायनमः दक्षकुक्षौ एंऐंकर्कटायनमः दक्षस्कंधे ओंऔंसिंहायनमः दक्षशिरोभा
गे अंअंःशंषंसंहंकन्यायैनमः वामशिरोभागे कं ॐ तुलायैरायनमः वामस्कंदे चं ॐ वृश्चि
कायनमः वामकुक्षौ टं ॐ धनुषेनमः वामवृषणेनमः तं ॐ मकरायनमः वामजान्वुनि
पं ॐ कुंभायनमः वामगुल्फे यंरंलंवंलंक्षंः मीनायनमः इतिराशिन्यासः अथपीठन्यासः
ॐसितासिताऽरुणश्यामहरितपीतान्यनुक्रमात् पुनःपुनःक्रमाद्देविपंचाशत्स्थानसंचये पी
ठानिसंस्मरेद्विद्वान्सर्वकामार्थसिद्धये इतिध्यात्वान्यसेत् ॐ अंकामरूपपीठायनमः शिरसि
ॐ आंवाराणसीपीठायनमः ऌखवृत्ते ॐ इंनेपालपीठायनमः दक्षनेत्रे ॐ ईंपौंड्रवर्धन

पीठायनमः वामे ॐ उं कश्मीरपीठायनमः दक्षकर्णे ॐ ऊं कान्यकुब्जपीठायनमः वामे ॥
ॐ ऋं पूर्णगिरिपीठायनमः दक्षनसि ॐ ॠं अर्बुदपीठायनमः वामायां ॐ लृं आम्रातकेश्व
रपीठाय॰ दक्षगंडे ॡं एकाम्रपी॰ वामे ॐ एं त्रिस्रोतःपीठा॰ ऊर्ध्वोष्ठे ॐ ऐं कामकोटपीठा॰ अ
धरे ॐ ओं कैलासपीठाय॰ ऊर्ध्वदंतेषु ॐ औं भृगुनगरपी॰ अधोदंतेषु ॐ अं केदारपी॰ लला
टे ॐ अः चंद्रपुरपी॰ चिबुके ॐ कं श्रीपुरपी॰ दक्षबाहुमूले ॐ खं ओंकारपी॰ कूर्परे ॐ गं जा
लंधरपी॰ मणिबंधे ॐ घं मालवपी॰ अंगुलीषु ॐ ङं कुलांतपी॰ अंगुल्यग्रे ॐ चं देवीकोटपी॰
वामबाहुमूले ॐ छं गोकर्णपीठाय॰ कूर्परे ॐ जं मारुतेश्वरपी॰ मणिबंधे ॐ झं अट्टहासपी
अंगुलीषु ॐ ञं विराजपी॰ अंगुल्यग्रे ॐ टं राजगृहपी॰ दक्षपादकक्षे ॐ ठं महापथपीठा
य॰ जानुनि ॐ डं कोलगिरिपी॰ गुल्फे ॐ ढं एलापुरपी॰ अंगुलीषु ॐ णं कालेश्वरपी॰ अ
गुल्यग्रे ॐ तं जयंतकपी॰ वामपादकक्षे ॐ थं उज्जयिनीपी॰ जानुनि ॐ दं चरित्रपुरपी॰ गुल्फे ॐ
धं क्षीरिकपी अंगुलीषु ॐ नं हस्तिनापुरपी अंगुल्यग्रे ॐ पं उड्डीशपी दक्षपार्श्वे ॐ फं प्रयाग
पी॰ वामे ॐ बं षष्ठीशपुरपी पृष्ठे ॐ भं मायापुरपी॰ नाभौ ॐ मं जलेश्वरपी उदरे ॐ यं मल
यगिरिपी॰ हृदि ॐ रं श्रीशैलपी दक्षांसे ॐ लं मेरुकपी॰ ककुदि ॐ वं गिरिवरपी वामांसे ॐ
शं महेंद्रपुरपी॰ हृदादिदक्षपाण्यंते ॐ षं वामनपुरपी॰ हृदादिवामपाण्यंते ॐ सं हिरण्यपुर
पी॰ हृदादिदक्षपादांते ॐ हं महालक्ष्मीपुरपी॰ हृदादिवामपादांते ॐ लं उड्यानपुरपीठा॰

श्री. १९
16

पादादिनाभ्यंतं ऐं ह्सः छायापुरपीठायनमः नाभ्यादिमूर्धांतं इतिपीठन्यासः ष्फुटमा
तृकास्थानेषुन्यस्तव्यः इतिपूर्वषोढान्यासः अथविधिविहितपद्मासनोमूलाधारा
र्पितचित्तवृत्तिर्मूलेप्रणवंवाएकवारंस्मरन्निडयावायुमापूर्य मूलाधारंप्रापय्यांगुष्ठा
नामाकनिष्ठाभिर्नासापुटौधृत्वातंवायुं कुंभयित्वा कुंभकसमये मूलेप्रणवंवाचतुर्गु
णंजपस्ततःपिंगलयाद्विगुणं तमेवजपन्वायुंशनैरेचयेत् इत्येकःप्राणायामः तदुक्तं
इडयापिवषोडशभिःपवनंकुरुषष्टिचतुष्टयमंतरगं त्यजपिंगलयाशनकैःशनकैर्दश
भिर्दशभिर्दशभिर्द्व्यधिकैरिति पुनर्ययैवरेचितंतयैवपुनरापूर्यकुंभयित्वान्यतोरेचयेदि
त्यन्यः एवमेववैपरीत्येन पुनर्विंशतिवारंषोडशद्वादशषड्वारंजपादौजपांतेचप्राणा
यामःकार्यः इतिप्राणायामत्रयंकृत्वा मूलविद्यायाऋष्या दिस्मरणंकुर्यात् ॐश्रीम
न्महात्रिपुरसुंदर्यैनमः ॐअस्यश्रीमहात्रिपुरसुंदरीमंत्रराजस्यश्रीदक्षिणामूर्तिऋषिः
पंक्तिश्छंदः श्रीमहात्रिपुरसुंदरीदेवता ऐंप्रथमकूटंबीजं सौंतृतीयकूटंशक्तिः क्लींद्वि
तीयकूटंकीलकं ममचतुर्विधपुरुषार्थसिद्धयेन्यासादौविनियोगः इतिकृतांजलिःस्मृ
त्वान्यसेत् श्रीदक्षिणामूर्तिऋषयेनमः शिरसि पंक्तिश्छंदसेनमः मुखे श्रीमहात्रिपुरसुं
दरीदेवतायैनमः हृदि। ऐंप्रथमकूटबीजायनमः गुह्ये सौंतृतीयकूटशक्तयेनमः पाद
योः क्लींद्वितीयकूटकीलकायनमःनाभौ ममचतुर्विधपुरुषार्थसिद्धयेन्यासादौविनि।

योगः इतिकृतांजलिः स्मृत्वान्यसेत् श्रीदक्षिणामूर्त्तिऋषये नमः शिरसि पंक्तिछंदसे नमः
मुखे श्रीमहात्रिपुरसुंदरीदेवतायै नमः हृदि। ऐं प्रथमकूटबीजाय नमः गुह्ये सौः तृतीय
कूटशक्तये नमः पादयोः क्लीं द्वितीयकूटकीलकाय नमः नाभौ ममचतुर्विधपुरुषार्थसि
द्धये न्यासादौ विनियोगः सर्वांगेषु व्यापकं न्यसेत् इति ऋष्यादिन्यासः ऐं प्रथमकूटं अंगु
ष्ठाभ्यां नमः क्लीं द्वितीयकूटं तर्जनीभ्यां स्वाहा सौः तृतीयकूटं मध्यमाभ्यां वषट् ऐं प्रथम
कूटं अनामिकाभ्यां हुं क्लीं द्वितीयकूटं कनिष्ठिकाभ्यां वौषट् सौः तृतीयकूटं करतलपृ
ष्ठाभ्यां फट् इतिकरन्यासः अथ षडंगन्यासः ऐं प्रथमकूटं हृदयाय नमः क्लीं द्वितीयं शिर
से स्वाहा सौः तृतीयं शिखायै वषट् ऐं प्रथमं कवचाय हुं क्लीं द्वितीयं नेत्रत्रयाय वौषट् सौः
तृतीयं अस्त्राय फट् इति षडंगं विधाय अस्त्रेण तालत्रयं दत्वा दशदिग्बंधनं कुर्यात् अथ यो
गपीठन्यासः तत्रांसद्वयोरुद्वयकल्पितपादचतुष्टयं योगपीठं निजदेहं ध्यात्वा न्यसेत् मूला
धारे ह्रं मंडूकाय नमः स्वाधिष्ठाने ह्रं कालाग्निरुद्राय नमः मणिपूरे मूलप्रकृत्यै ह्रं अना
हते आधारशक्त्यै हृदये कूर्माय तत्रैव अनंताय वराहाय पृथिव्यै तत्र पश्चिमादि विलोमे
न ह्रं इक्षुरससमुद्राय मदिरासमुद्राय घृतसमुद्राय दुग्धसमुद्राय तन्मध्ये ह्रं अं पं नव
खंडविराजितनवरत्नमयद्वीपाय तत्पश्चिमे ह्रं अं आं इं ईं उं ऊं ऋं ॠं पुष्परत्नायै नैरृते ॥

श्री· लृं लॄं एं ऐं ओं औं अं अः वैडूर्यरत्नाय दक्षिणे कं ५ नीलरत्नायनमः आग्नेये चं ५ विद्रुम
१८ रत्नायनमः पूर्वे टं ५ मौक्तिकरत्नायनमः ईशाने तं ५ मरकतरत्नायनमः उत्तरे पं ५
17 वज्ररत्नायनमः वायव्ये यं ५ गोमेदरत्नायनमः शंषंसंहंलंक्षः मध्ये पद्मरागरत्नाय· तन्म
ध्ये खंडमध्ये स्वर्णपर्वताय तदुपरि नंदनोद्यानाय तन्मध्ये कल्पवृक्षेभ्यो तन्मध्ये वसंता
दिषडृतुभ्यो तत्पश्चिमे इंद्रियाश्वेभ्यो तत्पूर्वे इंद्रियार्थगजेभ्योनमः तन्मध्ये विचित्रर
त्नभूमिकायै तत्पश्चिमे कालचक्रेश्वर्यैनमः नैरृते मुद्राचक्रेश्वर्यैनमः दक्षिणे॥ मातृच
क्रेश्वर्यैआग्नेये रत्नचक्रेश्वर्यैपूर्वे देशचक्रेश्वर्यैईशाने गुरुचक्रेश्वर्यैउत्तरे तत्वचक्रेश्वर्यैवा
यव्ये ग्रहचक्रेश्वर्यैमध्ये मूर्तिचक्रेश्वर्यैकरुणातोयपरिधये स्वर्णप्राकारायतन्मध्ये मणि
मंडपायतस्यनैरृत्यादिचतुष्कोणेषु वामावर्तेन कालरूपिणीशक्तये देशरूपिणीशक्तये
आकाररूपिणीशक्तये शब्दरूपिणीशक्तये मध्ये संगीतयोगिनीभ्यो तत्रैव समस्तप्रकटसि
द्धियोगिनीचक्रेभ्योनमः तन्मध्येमणिमयवेदिकायै श्वेतछत्राय तस्य रत्नसिंहासनायन
मः इतिहृदयपद्मविन्यस्य दक्षांसे ब्रह्मप्रेतासनायनमः वामांसे विष्णुप्रेतासनायनमः
वामोरौ रुद्रप्रेतासनायनमः दक्षोरौ ईश्वरप्रेतासनायनमः सर्वांगे ह्सौंः सदाशिवमहाप्रे·
तासनायनमः पुनर्दक्षांसे धर्माय वामांसे ज्ञानायवामोरौ वैराग्यायनमः दक्षोरौ ऐश्वर्याय

नृखे अधर्माय वामपार्श्वे अज्ञानाय नाभौ अवैराग्याय दक्षपार्श्वे अनैश्वर्याय पुनर्हृदि
मायायै तंत्रेव विद्यायै अनंताय धर्मायानंदकंदाय संविन्नालाय प्रकृतिमयपत्रेभ्यो विकारम
यकेसरेभ्यो नमः पंचाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायै कर्णिकायै तस्यामेव ॐ अं अर्कमंडला
यनमः ॐ सं सोममंडलायनमः ॐ रं वह्निमंडलायनमः ॐ सं प्रबोधात्मने सत्त्वाय ॐ रं प्रकृ
त्यात्मने रजसे तं मोहात्मने तमसे नमः अं आत्मने आं अंतरात्मने पं परमात्मने ह्रीं ज्ञानात्मने
कर्णिका चतुर्दिक्षु मध्ये च ज्ञानतत्त्वात्मने कलातत्त्वात्मने मायातत्त्वात्मने विद्यातत्त्वात्मने पर
तत्त्वात्मनेनमः इति पश्चिमादि प्रादक्षिण्येन विन्यस्य क्लीं सर्वशक्तिकमलासनायनमः इति व्या
पकं विन्यस्य तन्मध्ये श्रीचक्रं विभाव्य समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भर
हस्यपरापररहस्यपरापरातिरहस्ययोगिनी श्रीचक्रपादुकाभ्यो नमः इति सर्वांगे व्यापकं विन्य
स्य प्रथमकूटं शरीरात्मनेनमः द्वितीयकूटं बुद्ध्यात्मने तृतीयकूटं प्राणात्मने इति सर्वांगे व्यापकं
विन्यस्य हृदयत्रिकोणस्याग्रकोणे ऐं कामरूपपीठे ईशाने क्लीं पूर्णगिरिपीठे आग्नेये सौः जालंध
रपीठे तन्मध्यस्थबिंदौ तुरीयविद्यां महोड्यानपीठे मध्यस्थबिंदुचक्रे नवहिरण्मयसहस्रदल
कमलासनायनमः दक्षांसपृष्ठे अं आं सौः त्रिपुरासुधार्णवासनायनमः दक्षकर्णपृष्ठे ऐं क्लीं
सौः त्रिपुरेश्वरीपोतांबुजासनायनमः दक्षललाटभागे ह्रीं ह्रीं ह्रीं क्लीं ह्रीं सौः त्रिपुरसुंदरीदेव्या
त्मासनाय दक्षनेत्रे हैं ह्रीं ह्सौं त्रिपुरवासिनी सर्वचक्रासनाय चिबुकदक्षभागे हैं — ह्क्लीं।

श्री. १८ 18

ह्रींक्लींह्रौंसौः ब्लेंत्रिपुरमालिनीमाध्यसिद्धासनमाय श्रैकं २४ शिवशक्तिसदाशिवेश्वरशु
द्धविद्यामायाकलाविद्यारागकालनियति पुरुषप्रकृत्यहंकारबुद्धिमनःश्रोत्रत्वक्चक्षुर्जि
ह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवाय्वग्निसलिलपृथिव्यात्मने
षट्त्रिंशत्तत्त्वरूपायश्रीमहात्रिपुरसुंदरीयोगपीठायनमः इतिसर्वांगेव्यापकंन्यसेत् इतियो
गपीठन्यासः अथश्रीचक्रन्यासः ध्यानेयथा शरीरंचिंतयेदादौनिजंश्रीचक्ररूपिणं त्वगा
द्याकारनिर्मुक्तंज्वलत्कालाग्निसन्निभं इतिस्वशरीरंश्रीचक्ररूपंध्यात्वा । सृष्टिक्रमेणस्थि
तिश्रीचक्रन्यासः सचविद्याचक्रचक्रेश्वरीअंगत्रयात्मकः तत्रप्रथमंसंप्रदायात्पूर्ववत्कर
शुद्धिविद्ययाकरशुद्धिंविधाय तांतथैवविन्यस्य तथैवात्मरक्षांकृत्वा न्यासमारभेत तत्रा
दौविद्यान्यासः मूर्ध्नि ऐं प्रथमंगुह्ये ऐं द्वितीयकूटंगुरौ ऐं तृतीयकूटंदक्षनेत्रे ऐं प्रथमकू
टंवामे द्वितीयकूटंनासाग्रे तृतीयंदक्षकर्णे प्रथमंवामे द्वितीयंमुखे तृतीयंदक्षांसे प्रथमंवा
मे द्वितीयंपृष्ठे तृतीयंदक्षजानुनि । प्रथमंवामे द्वितीयंनाभौ तृतीयंपादयोः ऐंश्रींसौः नमः
जंघयोः ऐंक्लींसौः नमः जान्वोः ह्रींक्लींसौः नमः ऊर्वोः हसैंहसक्लींहसौंनमः स्फिजोः हसैंह
स्क्लींह्सौः नमः लिंगे ह्रींक्लींब्लेंनमः १४ ह्रींश्रींसौः २ हसैंहसक्लींहसौंनमः मूलपंचदशी २
हक्लींक्लींह्लैंनमः इतिमूर्ध्निविद्यांविन्यस्य मूलविद्यया मूर्धादिपादांतंपादादिहृदयांतंव्या
पकंन्यसेत् अथचक्रन्यासः मूलाधाराद्यधः स्थितोर्ध्वमुखरक्तसहस्रदलकमलकर्णि

कायां ॐ अंआंसौः त्रैलोक्यमोहनचक्रायनमः मूलाधारे ॐ ऐंक्लींसौं सर्वाशापरिपूरकच
क्रायनमः स्वाधिष्ठाने ॐ ह्रींक्लींसौः सर्वसंक्षोभणचक्रायनमः मणिपूरके ॐ हैं ह्क्लीं ह्सौः
सर्वसौभाग्यदायकचक्रायनमः अनाहते ॐ हसैं हसक्लीं हसौः सर्वार्थसाधकचक्रायनमः
विशुद्धिचक्रे ॐ ह्रींक्लींब्लें सर्वरक्षाकरचक्रायनमः लंपिकाग्रे ॐ ह्रींश्रींसौः सर्वरोगहरच
क्रायनमः आज्ञायां हसैं हसक्लीं हसौं सर्वसिद्धिप्रदचक्रायनमः मूर्धनि मूलपंचदशी।
सर्वानंदमयचक्रायनमः इतिनवचक्राणि विन्यस्य नवचक्रेश्वरीन्यासं कुर्यात् तत्र मूलाधा
राधः प्राग्वत् त्रैलोक्यमोहनेचक्रे अंआंसौः त्रिपुराचक्रेश्वर्यैनमः मूलाधारस्य सर्वाशापरिपू
रकाचक्रे ऐंक्लींसौः त्रिपुरेश्वरीच· ॐ स्वाधिष्ठाने सर्वसंक्षोभनेच· ॐ ह्रींक्लींसौं त्रिपुरसुंद
रीचक्रेश्वर्यैनमः मणिपूरकस्य सर्वसौभाग्यदायकेचक्रे हसैं हसक्लीं हसौः त्रिपुरवासिनी
चक्रेश्वर्यैनमः अनाहतस्य सर्वार्थसाधकेचक्रे हसैं हसक्लीं हसौं श्रीत्रिपुराचक्रेश्वर्यै
विशुद्धिस्य सर्वरक्षाकरेचक्रे ॐ ह्रींक्लींब्लें त्रिपुरमालिनीचक्रेश्वर्यै· लंपिकास्य सर्वरोगह
रेचक्रे ह्रींश्रींसौं त्रिपुरासिद्धाचक्रेश्वर्यैनमः आज्ञास्य सर्वसिद्धिप्रदेचक्रे हसैं हसक्लीं हसौः
त्रिपुरांबिकाचक्रेश्वर्यैनमः महाबिंदुस्य बिंदुचक्रे मूलपंचदशाक्षरीमुच्चार्य श्रीमहात्रिपुर
सुंदरीमहाचक्रेश्वरीश्रीपादुकायैनमः इतिविन्यस्य तत्तच्चक्रं परस्परसंलग्नं तत्तचक्रेश्वर्या।

श्री. धिष्ठितं तत्त्वचक्रं ध्यात्वा पुनः करशुद्धिं विधाय विन्यस्य ऐं मूलाधारे क्लीं हृदये सौः भ्रूमध्ये
१९ समस्तविद्यां ब्रह्मरंध्रे च विन्यस्य ॐ समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भ
रहस्यपरापररहस्यपरापरातिरहस्ययोगिनीचक्रपादुकाभ्यो नमः इति स्वरूपं श्रीचक्ररूपं व्या
यन्यापकं कुर्यात् इति श्रीचक्रन्यासः अथ त्रिविधषडंगन्यासः तत्रादौ रक्षाषडंगः ॐ ऐं क्लीं सौः :
नमः श्रीमहात्रिपुरसुंदरि मां रक्ष २ हृदयाय नमः एवं षडंगेषु न्यसेत् ततो मूलषडंगः प्र
थमकूटं हृदयाय नमः इत्यादि मूलषडंगः अथ बालाषडंगप्रवतीन्यासः ऐं सर्वज्ञायै हृद
याय० क्लीं नित्यतृप्तायै शिरसे० सौः अनादिबोधायै शिखा० ऐं स्वतंत्रायै कव० क्लीं नित्यमलु
प्तायै नेत्र० सौः अनंतायै अस्त्राय फट् अथ मूलविद्यान्यासः मूलाधारे प्रथमकूटं नमः
हृदये द्वितीयं भ्रूमध्ये तृतीयं सर्वांगे तुरीयविद्यां विन्यस्य प्राग्वत्समस्तविद्याव्यापकं
न्यसेत् अथ नवयोनिन्यासः वामकर्णे ऐं नमः दक्षकर्णे क्लीं नमः चिबुके सौः नमः वामशं
खे ऐं दक्षशंखे क्लीं मुखे सौः वामनेत्रे ऐं दक्षनेत्रे क्लीं नासायां सौः वामांसे ऐं दक्षांसे
क्लीं हृदये सौः वामकूर्परे ऐं दक्षकूर्परे क्लीं नाभौ सौः वामजानुनि ऐं दक्षजानुनि क्लीं
लिंगे सौः वामपादे ऐं दक्षपादे क्लीं गुह्ये सौः वामपार्श्वे ऐं दक्षपार्श्वे क्लीं हृदि सौः वामस्त
ने ऐं दक्षस्तने क्लीं कंठे सौः नमः इति नवयोनिन्यासः अथांतर्नवयोनिन्यासः ततो मूलाधा

रादिषट्चक्रं ललाटसीमंतब्रह्मरंध्रेषु नवसु स्थानेषु चतुरस्रवेष्टितनवयोनीः परिकल्प्य
तासु त्रिकोणादिप्रादक्षिण्यक्रमेण प्रागुक्तबीजत्रयं मनसा ध्यायन्न्यसेत् अथ [illegible]न्यासः शि
खायां ४ प्रथमकूटं चिबुके द्वितीयं मुखे तृतीयं १ मुखे प्रथमं कंठे द्वितीयं चिबुके तृतीयं २
चिबुके प्रथमं हृदये द्वितीयं कंठे तृतीयं ३ कंठे प्रथमं नाभौ द्वितीयं हृदये तृतीयं ४ हृदये
प्रथमं स्वाधिष्ठाने द्वितीयं नाभौ तृतीयं ५ नाभौ प्रथमं मूलाधारे द्वितीयं स्वाधिष्ठाने तृतीयं ६
स्वाधिष्ठाने प्रथमं ऊर्वोः द्वितीयं मूलाधारे तृतीयं ७ मूलाधारे प्रथमं जान्वोः द्वितीयं ऊर्वोः
तृतीयं ८ ऊर्वोः प्रथमं पादयोः द्वितीयं जान्वोः तृतीयं ९ अथा[illegible]न्यासः शिरसि ऐं सरस्वत्यै
नमः ललाटे ह्रीं पार्वत्यै नमः दक्षनेत्रे श्रीं सवित्रे नमः वामे मं अग्नये नमः मुखवृत्ते ठं चंद्रम।
से नमः जिह्वायां श्रीं श्रियै नमः दक्षकपोले स्वां दंतिने नमः वामे ह्रां दंतिने नमः इत्यष्टन्यासः
इत्थं न्यासान्विधाय प्रणवसंपुटितां श्रीषोडशार्णां सर्वांगे व्यापकत्वेन विन्यस्य पुनस्तथा विधा
तां हृदये न्यसेत् अथ [illegible]ण्यादिकरषडंगन्यासं विधाय शिवोऽहमिति भावयन् वक्ष्यमाणसं।
क्षोभिण्यादिनवमुद्राः पाशादिचतुर्मुद्राश्च बद्ध्वा सर्वावयवभावेन कामकलारूपमात्मानं।
ध्यात्वा शक्त्युत्थापनमुद्रां बद्ध्वा प्रातःस्मरणोक्तप्रकारेण मूलाधारात्कुंडलिनीमुत्थाप्य त
त्रैव षट्चक्रभेदं विधाय तत्तेजसा परिणतां श्रीपरदेवतां हृदयकमलगतसिंहासने श्रीचक्र

श्री॰ राजेकामेश्वरांकस्थां सर्वाभरणभूषितां त्रिवंशमुद्रितकरो ध्यायेद्यथा ॐ उद्यच्चंद्रोदय
२॰ न्नव्यरक्तपीयूषवारिधेः मध्ये हेममयीं भूमिं स्मरेन्माणिक्यमंडितां तन्मध्ये नंदनो
द्यानं मदनोन्मादनं महत् नित्यामुदितपूर्णेन्दुज्योत्स्नाजालविराजितं सदा सह वसंतेन
20 कामदेवेन रक्षितं कदंबचूतपुन्नागनागकेसरचंपकैः वकुलैः पारिजातैश्च सर्वर्तुकुसुमो
ज्ज्वलैः झंकारमुखरैर्भृंगैः कूजद्भिः कोकिलैः शुभैः नानावर्णैरथान्यैश्च द्विजसंघैर्निषेवितं
शिखिकारंडहंसाद्यैर्नानापक्षिभिराहृतं नानापुष्पलताकीर्णैः शोभितं हृद्यखंडकैः पर्यंतदी
र्घिकोत्फुल्लकमलोत्पलसंभवैः रजोभिर्धूसरं सम्यक्सेवितं मलयानिलैः ध्यात्वैवं नंदनो।
द्यानं तदंतः प्राङ्गणं स्मरेत् शुद्धकांचनसंकाशं वस्त्रयाभिरलंकृतं प्राङ्गणे चिंतयित्वेत्थं सु
रसिद्धनिषेवितं तन्मध्ये मंडपं ध्यायेद्ध्यानब्रह्मांडमंडले सहस्रादित्यसंकाशं चतुरश्रं स्वशो
भनं रत्नतेजःप्रभापुंजपिंजरीकृतदिङ्मुखं मध्यस्तंभविनिर्मुक्तं कोणस्तंभसमन्वितं महामा
णिक्यवैडूर्यरत्नकांचनभूषितं मुक्तादामवितानाढ्यं रत्नसोपानभूषितं मंदवायुसमाक्रांतरं
धध्रूपतरंगितं रत्नचामरघंटादिविमानैरुपशोभितं जातीचंपकपुन्नागकेतकीमल्लिकादि
भिः रक्तोत्पलसितांभोजमाधवीभिः सपुष्पकैः वल्लाभिश्चित्रमालाभिः सर्वत्र समलंकृतं।
तिर्यगूर्ध्वलसद्रत्नपुत्तलीकोटिमंडितं नानारत्नादिभिर्दिव्यैर्निर्मितं विश्वकर्मणा तन्मध्ये विद

पताकाभिश्च हैमीभिः साकुराभिरलंकृताम् २

लांध्यायेद्देदिकांशतयोजनां सहस्रादित्यसंकाशांकोटिमाणिक्यमंडितां चतुर्द्वारसमोपेतां
माणिक्यद्वारतोरणां प्रदीपैः पूर्णकुंभैश्च सर्वतः समलंकृतां रत्नपीठस्थितैर्दिव्यैरागमैः पा
रिशोभितां तदंतरंतराश्चोद्यन्मणिदर्पणसंकुलां मधुरोदारविविधगंधर्वस्तोत्रबृंहितां शृंगा
रसमन्नैर्देवैर्नवयौवनशोभितैः भ्रमरीनिकरैर्नानामणिभूषणभूषितैः वीणावेणुमृदंगा
दिवादनेनचन्दनकैः प्रीणयद्भिर्महादेवीपरीतांपरितः सदा रत्नसिंहासनंतस्यावेद्यामध्येस
रेच्छुभम् विरिंचिरुद्रविष्णवीशशावपादचतुष्टयम् सदाशिवमयंसाक्षान्नस्मित्परिशिवा
त्मकं पुष्पपर्यंकमैश्वर्यंतत्रश्रीचक्रनामकं तन्मध्येयोनिमध्यस्थेश्रीमद्रत्नपीठके पर्यंक
बंधविलसत्त्वल्लिकासनलालितां ध्यायेत्परशिवांकस्थांपद्ममध्योज्ज्वलाकृतिं ततोध्यानं
प्रवक्ष्यामित्रिदशैःसेवनीयकं ततःपद्मनिभांदेवींबालार्ककिरणारुणां जपाकुसुमसंकाशां
दाडिमीकुसुमोपमां पद्मरागप्रतीकाशांकुंकुमोदकसन्निभां स्फुरन्मुकुटमाणिक्यकिंकि
णीजालमंडितां कालालिकुलसंकाशकुटिलालकपल्लवां प्रत्यग्रारुणसंकाशवदनांभोज
मंडलां किंचिदर्धेन्दुकुटिलललाटमृदुपट्टिकां पिनाकधनुराकारभ्रूलतांपरमेश्वरीं आ
नंदमुदितोल्लोललोलान्दोलितलोचनां स्फुरन्मयूखसंघातविलसद्धेमकुंडलां सुगंडमंड
लाभोगजितेन्दुमुकुतमंडलां विश्वकर्मादिनिर्माणसूत्रसुस्पष्टनासिकां रक्तविद्रुमबिंबाभर
कोष्ठीमसृतोपमां दाडिमीबीजवक्त्राभदंतपंक्तिविराजितां स्मितमाधुर्यविजितमाधुर्यरस

श्री. सागरां अनेकोपमगुणोपेतचिबुकोद्देशशोभितां कंबुग्रीवां महादेवीं म्रणालललितैर्भुजैः
२१ मणिकंकणकेयूरभाराविन्नैः प्रशोभितां रक्तोत्पलदलाकारसुकुमारकरांबुजां करांबु-
जनखज्योतिर्विराजितनभःस्थलीं मुक्ताहारलतोपेतसमुन्नतपयोधरां त्रिवलीवलना
युक्तमध्यदेशसुशोभितां लावण्यसरिदावर्त्ताकारनाभिविभूषितां अनर्घ्यरत्नघटितकां
चीयुक्तनितंबिनीं नितंबबिंबद्विरदरोमराजीवरांकुशां कदलीललितस्तंभसुकुमारोरु
मीश्वरीं लावण्यकदलीतुल्यजंघायुगलमंडितां गूढगुल्फपदद्वंद्वप्रपदाजितकच्छ
पां ब्रह्मविष्णुशिरोरत्ननिर्घृष्टचरणांबुजां तत्तदीर्घांगुलीभास्वन्नखचंद्रविराजितां शी
तांशुरत्नसंकाशकांतिसंततानहासिनीं लौहित्यजितसिंदूरजपादाडिमरागिणीं रक्तव
स्त्रपरीधानां पाशांकुशकरोद्यतां रक्तपद्मनिविष्टांच रक्ताभरणभूषितां चतुर्भुजां त्रिनेत्रां च
पंचबाणधनुर्धरां कर्पूरशकलोन्मिश्रतांबूलपूरिताननां महामृगमदोद्दामकुंकुमारुण
विग्रहाम् सर्वशृंगारवेशाढ्यां सर्वालंकारभूषितां जगदाह्लादजननीं जगद्रंजनकारिणी
म् जगदाकर्षणकरीं जगत्कारणरूपिणीम् सर्वमंत्रमयीं देवीं सर्वसौभाग्यसुंदरीम् सर्व
लक्ष्मीमयीं नित्यां परमानंदरूपिणीम् एवं ध्यायेन्महेशानीं महात्रिपुरसुंदरीम् इति स्वैवकं
तध्यात्वा मूलविद्यया स्वशिरसि पुष्पांजलिं दत्वा पुनर्हृदयकमले यथोक्तरूपां सांगां सावर
णां ध्यात्वा वक्ष्यमाणप्रकारेण पीठपूजापूर्वकं सांगां सावरणां मानसैरुपचारैः संपूज्य ॥

21

नैवेद्यं दत्वा भोजनावसरे तर्पणं देवं कुर्यात् तत्र मूलाधारे आत्मांतरात्मपरमात्मज्ञानात्मेत्या
त्मचतुष्टयं चतुरस्रं कुंडल्पयित्वा समुज्ज्वले चित्कुंडं ध्यात्वा श्रीपरदेवतां ध्यात्वा तत्स्रुवे मूलो
ते अहंतां जुहोमि स्वाहा इत्याद्यहंताममत्वपैशुन्यकामक्रोधलोभमोहमदमात्सर्याणि स्रुच
माणस्रुगुरुक्रमतः स्रुवेण प्रत्येकं हुत्वा अथवा धर्माधर्महविर्दीप्ते स्वात्माग्नौ मनसा स्रुचा
स्रुचमाणवर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं इति हुत्वा प्रकाशाकाशहस्ताभ्यामवलंब्यात्म
नीस्रुचं धर्माधर्मकलास्नेहपूर्णं वह्नौ जुहोम्यहं स्वाहा इति हुत्वा पुनर्हृदयकमले श्रीदेवीं
ध्यात्वा अन्नराधेशानादिसर्वोपचारैराराध्य मूलं यथाशक्ति जप्त्वा प्राणायामादिना जपं सम
र्प्य श्रीगुरुं प्रणम्य स्वदेहं गंधादिभिरलंकृत्य कलशस्थापनं कुर्यात् ॥ तत्र स्ववामभागे
षट्कोणांतर्गतत्रिकोणवृत्तबाह्यवृत्तचतुरस्रं कृत्वा स्वदक्षे त्रिकोणवृत्तबिंबमंडलं भूमौ
विरचय्य तत्राधारशक्त्यै नमः इति संपूज्य तत्राधारं निक्षिप्य तदुपरि अस्त्राय फडिति शोधितं
नमः इति मंत्रेण पूरितं पात्रं शंखादिकं वा संस्थाप्य तत्र गंगेत्यादितीर्थमावाह्य गंधादीन्प्रण
वेन निक्षिप्य वह्निसूर्यसोमकलाभिः संपूज्य धेनुमुद्रां प्रदर्श्य स्वमंत्रेण संपूजयेत् इति
विहितसामान्यार्घोदकेन स्ववामे कृतमंडलमभ्युक्ष्य तत्राधारशक्त्यै नमः मंडूकाय नमः
कमठाय नमः मूलप्रकृत्यै नमः शेषाय नमः पृथिव्यै नमः सुधासमुद्राय नमः मणिद्वीपा
य नमः चिंतामणिगृहाय नमः रत्नवेदिकायै नमः मणिपीठाय नमः नानामुनिगणेभ्यो

श्री· नमः धर्मायनमः ज्ञानायनमः वैराग्यायनमः ऐश्वर्यायनमः अधर्मायनमः अज्ञानायन
२२ मः अवैराग्यायनमः अनैश्वर्यायनमः शेषायनमः पद्मायनमः प्रकृतिमयपत्रेभ्योनमः
22 विकृतिमयकेसरेभ्योनमः पंचाशद्बीजभूषितकर्णिकायै सूर्यमंडलायनमः सोममं
डलायनमः वैश्वानरमंडलाय सं सत्वाय रं रजसे तं तमसे आं आत्मने अं अंतरात्मने ॥
पं परमात्मने ह्रीं ज्ञानात्मने वामायै ज्येष्ठायै रौद्र्यै अंबिकायै इच्छायै ज्ञानायै क्रियायै
कुब्जिकायै चित्रायै विषघ्निकायै दूत्यै आनंदायै मनोन्मन्यै ऐं परायै ऐं अपरायै ऐं विद्रू
पायै ह्सौः सदाशिवप्रेतपद्मासनायनमः इतिमंडलंसंपूज्य तत्राधारंसंस्थाप्य रं वह्निमं
डलायदशकलात्मनेनमः ॐ यं धूम्रायैनमः ॐ रं नीलवर्णाय ॐ लं कपिलायै ॐ वं
विस्फुलिंगिन्यैनमः ॐ शं ज्वालायै ॐ षं हैमवत्यै ॐ सं कव्यवाहिन्यै ॐ हं हव्यवाहिन्यै ॐ
लं रौद्र्यै ॐ क्षं संकर्षिण्यैनमः इतिप्रपूज्य तत्रफडितिकलशंप्रक्षाल्य ऐं संदीपनि संदीप।
निज्वालामालिनि ह्रीमितिसंदीपनीविद्यया योनिमुद्रया संदीप्य हूमित्यवगुंठ्य कारणे
नप्रपूर्य रक्तवस्त्रमाल्यादिनासंभूष्य ॐ शं भगनाथयथादेविविलग्नाययथास्थिता ब्रह्म
णाचयथापूर्वंतथात्वांस्थापयाम्यहं इतिपठित्वा श्रीदेवीकुंभंसंस्थाप्य तत्राधारेकल
शंस्थापयेत् अं अर्कमंडलायद्वादशकलात्मनेनमः इतिप्रपूज्य ॥ द्वादशकलाःपूज
येद्यथा ॐ कं भं तपिन्यैनमः ॐ खं बं तापिन्यैनमः ॐ गं फं बोधिन्यैनमः घं पं रोधिन्यैन·

ङं नँ कालिन्यै नमः चं यँ शोषिण्यै नमः छं दँ वेश्यै नमः जँ थं आकर्षिण्यै नमः फं तं मायायै
नमः ञं णं विश्वावत्यै नमः टं ठं हेमप्रभायै नमः ढं डं लक्ष्मायै नमः इति कलशं संपूज्य हँः लं
हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं
ऌं ॠं ऋं ऊं उं ईं इं आं अं इति पठन् पानकामृतेन तं कलशं प्रपूर्य तदमृतं चंद्ररूपं विभाव्य सः
चंद्रमंडलाय षोडशकलात्मने नमः इति प्रपूज्य षोडशकलाः पूजयेद्यथा ऐं अं अमृतायै न
मः आं मानदायै नमः इं तुष्ट्यै नमः ईं पुष्ट्यै नमः उं प्रीतये नमः ऊं रतये नमः ऋं श्रियै नमः ॠं
ह्रियै नमः ऌं स्वधायै नमः ॡं रात्र्यै नमः एं ज्योत्स्नायै नमः ऐं हैमवत्यै नमः ओं छायायै नमः औं
पूर्णिमायै नमः अं नित्यायै नमः अः अमावास्यायै नमः एताः कलाः द्रव्येन संपूज्य फडिति संरक्ष्य
हुमित्यवगुंठ्य मूलेन संवीक्ष्य नमः इत्यभ्युक्ष्य मूलेन गंधमाघ्राय तत्र कलशे मूलं पठन् अं
आं सौं तं इति त्रिकोणं विलिख्य मध्ये विंदुविंवे हं लंदः तत्र परां ध्यात्वा इष्टदेवतां संपूजयेत्।
ततः ओं ह्रीं परस्वामिनि परमाकाशस्वामिनि तिमृत्यवाहिनि चंद्रार्काग्नि भक्षिणि पात्रे विश विश
स्वाहा इति चटं स्पृष्ट्वा दशधा पठेत् देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वधायै स्वा
हायै च नित्यमेव भवत्विह इति त्रिः अं आं ९१ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं
च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् इति ऋचमपि दशधा जपेत् ९ मधु

श्री॰ वाताऋतायतेमधुक्षरंतिसिंधवः माध्वीर्नःसंत्वोषधीर्मधुनक्तमुतोषसः मधुमत्पार्थिवंर
२३ जःमधुद्यौरस्तुनःपिता मधुमान्नोवनस्पतिर्मधुमानस्तुसूर्यः माध्वीर्गावोभवंतुनः ॐमधुम
धुमधु इतिदशधाजपेत् १० ऐंह्रींश्रींआनंदेश्वरायविद्महे श्रीसुरादेव्यैधीमहितन्नोर्धनारी
श्वरःप्रचोदयात् इतिगायत्रींदशधाजप्त्वा १० हंसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथि
र्दुरोणसन्नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतं इतित्रिर्जपेत् ३ अग्निमी
डेपुरोहितंयज्ञस्यदेवंऋत्विजम् होतारंरत्नधातमं इत्यपित्रिर्जपेत् ३ वांवींवूंवैंवौंवः ब्रह्म
शापमोचितायैसुरादेव्यैवौषट् इतिदशधाजप्त्वा १० इषेत्वोर्जेत्वावायवस्थपायवस्थदेवोव
सविताप्रार्पयतु श्रेष्ठतमायकर्मणे इतिऋचमेकवारंपठेत् १ ॐह्रींश्रींक्रांक्रींक्रूंक्रैंक्रौंक्रः
सुधेकृष्णशापंमोचयमोचय अमृतंस्रावय २ स्वाहा इतित्रिर्जपेत् अग्नआयाहिवीतये गृ
णानोहव्यदातये निहोतासत्सिवर्हिषि इतिदशधाजपेत् १० शुक्रशापहरींविद्यांपठेद्यथा।
शांशींशूंशैंशौंशः शुक्रशापमोचितायैसुरादेव्यैनमः ॐसूर्यमंडलसंभूतेवरुणालय
संभवे अमावीजमयेदेवि शुक्रशापाद्विमुच्यतां वेदानांप्रणवोवीजंब्रह्मानंदमयोयदि तेन
सत्येनहेदेविब्रह्महत्यांव्यपोहतु एकमेवपरंब्रह्मस्थूलसूक्ष्ममयंध्रुवं कचोद्भवांब्रह्मह
त्यांतेनतेनाशयाम्यहं ब्रह्मशापविनिर्मुक्तात्वंमुक्ताविष्णुशापतः विमुक्तारुद्रशापेनपवि

त्राभवसांप्रतं इतित्रिःपठित्वा ३ शन्नोदेवीरभिष्टयेआपोभवंतुपीतये शंय्योरभिस्रवंतुनः
इतिदशधाजपेत् १० ह्रीं श्रीं क्षां क्षीं क्षूं क्षैं क्षौं क्षः क्षुरिकाकारिणि शोभिणि विकारानस्मद्र
क्षस्पहरहरस्वाहा इतिकलशोपरिदशधापठित्वा १० योविश्वचक्षुरुतविश्वतोमुखो विश्वतो
हस्तउतविश्वतःस्यात् संबाहुभ्यांनमतिसंपतत्रैर्द्यावापृथिवीजनयन्देवएकः इतिदशधा
जपेत् १० ततःसहस्रारेगुरुंध्यात्वा हृत्कमलेइष्टदेवतांप्रणम्य श्रीतिरस्करिणींध्यात्वाजपे
त् ॐनीलतोयदसंकाशां नीलकुंतलशोभितां नीलांवरधरांदेवीं नीलोत्पलविलोचनां नील
पुष्पविभूषाढ्यां नीलालंकारभूषितां नीलांगरागसंछन्नां नीलवैडूर्यमालिनीं इंद्रनील
निवद्धोग्र महार्घमणिभूषणां नीलवाजिसमारूढां नीलावज्ञायुधांपरां निद्रापटेननी
लेनभुवनानिचतुर्दश मोहयंतीमहामायांह्ययनिंदकभक्षिणीं वीरपानरतान्वीरान्पालयंतीं
समंततः संकेतमंडलं दिव्यंछादयंतीसर्वासदा परमानंदवपुषंपरमानंदभैरवीं परमानंदज
ननींप्रणमामिपरांबिकां इतितिरस्करिणींध्यात्वा मंत्रंजपेत् ऐं क्लीं ब्लैं ह्रीं तिरस्करिणिस
कलजनवाग्वादिनिसकलपशुजनकृतमनश्चक्षुःश्रोत्रजिह्वाघ्राणादीनितिरस्कुरुकुरुठः
ठः स्वाहा इतिचदेदशधाजप्त्वा ॐपावमान्यःपरंब्रह्मशुद्धंज्योतिःसनातनं पिचूत्तस्योपतिष्ठे
तन्नीरसर्पिर्मधूदकैः इतित्रिः पावमानंपरंब्रह्मपावमानःपरोरसः पावमानंपरंज्ञानंतेनत्वां

श्री·
२४

पावयाम्यहं इतित्रिर्जप्त्वा श्रीगुरुं ध्यात्वा वं इति जपेत् हंसः इत्यर्कमंत्रं जपेत् कुंडलिन्याः
प्रयोगेनामृतं वामनासापुटात्कलशे इति क्षिपेत् ततोऽमृतमुद्रयामृतीकृत्य ह्रीं श्रीं क्लीं अमृ
तेऽमृतोद्भवेऽमृतवर्षिणि अमृतं स्रावय २ अं आं अमृतेश्वर्यै नमः इति त्रिः पठित्वा ।
अमृतमयं घटं ध्यात्वा कर्पूरैलालवंगकस्तूरीचंदनोशीरमिश्रितं विधाय मूले ॐ गं
गं गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिंधुकावेरि जलेऽस्मिन्सन्निधिं कुरु इति ती
र्थानंकुशमुद्रयावाह्य सर्वतीर्थमयं द्रव्यं ध्यायेत् ततो द्रव्यमध्ये बिंदुयुतं पूर्ववत्त्रिको
णं विभाव्य योनिमुद्रां निबद्ध्य बिंदावानंदभैरवं सुरादेवीं च ध्यायेद्यथा ॐ सूर्यकोटिप्र
तीकाशं चंद्रकोटिसुशीतलं अष्टादशभुजं देवं पंचवक्त्रं त्रिलोचनं अमृतार्णवमध्य
स्थे ब्रह्मपद्मोपरिस्थितं वृषारूढं नीलकंठं सर्वाभरणभूषितं कपालखट्वांगधरं घं
टाडमरुवादिनं पाशांकुशधरं देवं गदामुसलधारिणं खड्गखेटकपट्टिशमुद्गरशूल
कुंतिनं विचित्रखेटकं मुंडवरदाभयपाणिकं लोहितं देवदेवेशं भावयेत्साधकोत्तमः द
त्वा पुष्पांजलिं कुंभे जपेदानंदभैरवं इति ध्यात्वा कुंभे पुष्पांजलिं दत्वानंदभैरवमंत्रं दशधा
जपेत् हसक्षमलवरयूं आनंदभैरवाय वौषट् इति दशधा जप्त्वा आनंदभैरवांकोपवि
ष्टां सुरादेवीं ध्यायेद्यथा ॐ समुद्रे मथ्यमाने तु क्षीराब्धौ सागरोत्तमे तत्रोत्पन्ना सुरादेवी

कुमारीरूपधारिणीं भावयेत्त्वरितादेवीं चंद्रकोटियुतप्रभां हिमकुंदेंदुधवलां पंचवक्त्रां त्रिलोचा-
नां अष्टादशभुजैर्युक्तां सर्वानंदकरोद्यताम् प्रहसंतीं विशालाक्षीं देवदेवस्य सन्मुखीं दत्वाघ्र
घ्यांजलिं कुंभजपेदानंदभैरवीं इतिध्यात्वा सहक्षमलवरयऊं त्वरितादेव्यै वौषट् इतिदशधाज-
प्त्वा महामुद्रायोनितियेन्मत्स्यमुद्राः प्रदर्शयेत् ततोलेलिहानाख्यांमुद्रां वद्धा कुंडलिनीमु-
न्मूलाधारात्समुत्थाप्य सुषुम्नावर्त्मना द्वादशांतेसमानीय सोहंहंसः इतिस्मरं शिवेनस-
हसंयोज्य परमानंदमयोभूत्वा तदुद्भवामृतेनहृष्टिंवामनासापुटेनप्रणवंस्मरन् परद्वयेति
योज्य सान्द्रादमृतेनत्वाद्यं कलशं ध्यायेत् ततोवमितिवरुणवीजमुच्चार्य मूलमंत्रंदशधा
जप्त्वा १० चंद्रातिःस्वतपूर्वकंनानाविधपुष्पमाल्यभूषण धूपदीपविविधौषधप्रणामस्तुतिभिः
कलशंसंपूज्य सर्वदेवमयंकुंभंध्यायेत् इतिघटपूजा अथश्रीविशेषार्घ्यपात्रपूजा ततआत्मश्रीच-
क्रयोर्मध्ये त्रिकोणषट्कोणवृत्तचतुरस्रंविलिख्य चातुरस्रे पूर्णागिरिपीठायनमः जालंधरपी-
ठायनमः इतिसंपूज्य षट्कोणेषडंगंसंपूज्य त्रिकूटेनत्रिकोणाग्रदक्षोत्तरंसंपूज्यमध्येआधा-
रशक्तीःसंपूज्य त्रिकोणगर्भेयंत्रिकोषट्कोणभूषितांसंस्थाप्य नमः इतिसामान्यार्घ्यजलेनाभ्यु-
क्ष्य यंधूम्रार्चिषेनमः रंऊष्मायैनमः लंज्वलिन्यैनमः वंज्वालिन्यैनमः शंविस्फुलिंगिन्यै
नमः षंसुश्रियैनमः संसुरूपायैनमः हंकपिलायैनमः लंहव्यवाहायैनमः क्षंकव्यवाहा-

येनमः इतिसंपूज्य मध्ये रंवह्निमंडलायदशकलात्मनेनमः इतिसंपूज्य षट्कोणेषडंगंच
संपूज्य त्रिकोणे त्रिकूटंमध्येमूलेनदेवींसंपूज्य ङूंङूंब्लूंलांऽचषकायस्वाहा इतिपात्रंवाम।
करेणधृत्वा फडितिप्रक्षाल्य ॐऐंह्रींश्रींश्रीमहात्रिपुरसुंदर्याविशेषार्घ्यपात्रंस्थापयामिनमः
इतिपात्रंयंत्रिकोपरिसंस्थाप्य तत्रकंभंतपिन्यैनमः गंफंधूम्रायैनमः घंपंमरीच्यैनमः ङं·
नंज्वलिन्यैनमः चंधंरुच्यैनमः छंदंसुषुम्णायैनमः जंथंभोगदायैनमः झंतंविश्वायैन
मः ञंणंबोधिन्यैनमः टंढंधारिण्यैनमः ठंडंक्षमायैनमः इतिसंपूज्य अंअर्कमंडलायद्वा
दशकलात्मनेनमः इतिसंपूज्य त्रिकोणवृत्तषट्कोणंपात्रेविलिख्य समस्तव्यस्तमंत्रेणसं
पूज्यत्रिकोणेत्रिकूटंसंपूज्य वमितिवरुणबीजंविलोममातृकांचपठन् तत्रमुद्रयामृते
नत्रिकोणंप्रपूर्यजलेनचभागमेकंप्रपूर्य तत्रसुगंधादिनिक्षिप्य अंअमृतायैनमः आंमान
दायैनमः इंपूषायैनमः ईंतुष्ट्यैनमः उंपुष्ट्यै· ऊंरत्यै· ऋंधृत्यै· ॠंशशिन्यै· ऌंचंद्रिकायै·
ॡंकांत्यै॰ एंज्योत्स्नायै॰ ऐंश्रियै ओंप्रीत्यै औंअंगदायै अंपूर्णायै॰ अः पूर्णामृतायैनमः
इतिसंपूज्य ॐषोडशकलात्मनेसोममंडलायनमः इतिसंपूज्य पूर्ववद्यंत्रं द्रव्येविलिख्य
त्रिकोणरेखायां अं १६ कं १६ थं १६ इतिविलिख्यमध्ये हंलंक्षः कूटत्रयेणत्रिको
णंसंपूज्य षट्कोणेषडंगंच गंगेत्यादितीर्थमावाह्य आनंदभैरवभैरव्यौ स्वस्वमंत्रेण ॥

संपूज्य वामावर्त्तेन देव्यष्टकं पात्रे पूजयेत् ॐ ह्रीं अं द्राविण्यै वौषट् ॐ ह्रीं यं वेदिन्यै वौषट् ॐ ह्रीं
वं भ्रान्तादिन्यै वौषट् ॐ ह्रीं लं वोधिन्यै वौषट् ॐ ह्रीं मं उन्मादिन्यै वौषट् ॐ ह्रीं क्षं संमोहिन्यै वौषट्
ॐ ह्रीं रं भ्रामिन्यै वौषट् ॐ ह्रीं सं क्लेदिन्यै वौषट् ॐ ह्रीं हं मूर्छिन्यै वौषट् मध्ये संपूज्य रत्नेश्वरीं
पूर्वादितः पूजयेद्यथा ग्लूं गगनरत्नेभ्यो नमः पूर्वे स्लूं स्वर्गरत्नेभ्यो नमः दक्षिणे म्लूं पाता
लरत्नेभ्यो नमः पश्चिमे न्लूं मर्त्यरत्नेभ्यो नमः उत्तरे मध्ये ह्लूं नागरत्नेभ्यो नमः इति सं
पूज्य मांसादीं शोधयेद्यथा तत्र चतुरस्रं विंदुं विलिख्य तत्र मांसादिपात्राणि संस्थाप्य ॥
अस्त्राय फडिति मांसमान्यार्घोदकेनाभ्युक्ष्य हुमिति अवगुंठ्य यमिति संशोष्य रमिति सं
दह्य वमिति आप्लाव्य धेनुमुद्रयामृतीकृत्य योनिमुद्रां प्रदर्श्य मत्स्यमुद्रयाच्छाद्य आ
नंदभैरवमंत्रं मूलं दशधा पठित्वा ॐ छागलाजैर्मांसेन कृतरूपाय विल्वे वल्यर्थं शि
वशक्त्योस्तं प्रपद्ये विल्वमव्ययं प्रतर्पयामि वल्यर्थं पवित्रीभव सांप्रतं इति त्रिः पठित्वा ह्रीं हरये
नमः इत्यपि त्रिः पठित्वा ऋचं च पठेत् ॐ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठः
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा इति मांसशोधनं अथ मीनशोध
नं ॐ कृतावतारो हरिणा कलिना पीडितं जगत् वलिना निगृहीतं च कौलिकानां हितेच्छ
या भैरवीपरितोषार्थं स्वयं मीनो भवेद्धरिः ह्रीं हरये नमः इति त्रिः पठित्वा ॐ त्र्यंबकं यजामहे

श्री॰
२६

26

सुगंधिंपुष्टिवर्धनं उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् इतिमीनशोधनं अथमुद्राशो
धनं ॐदेवताध्वजनीयानिसौरभेयाणिसांप्रतं वस्त्वर्थं देवदेवोऽस्य पवित्राणीहसिद्धये मू
लंदशधाप्रजप्य ॐतद्विष्णोःपरमंपदंसदापश्यंतिसूरयःदिवीवचक्षुराततंतद्विप्रासोविप
ण्यवोजागृवांसःसमिंधतेविष्णोर्यत्परमंपदं २ ह्रींहृद्येनमः २ इतिमुद्राशोधनं अथकुं
डगोलादिशोधनं कुंडगोलोपरियेनयोनिमुद्रात्रयंप्रदर्श्य मूलंदशधाजप्त्वा विष्णु
र्योनिंकल्पयतुत्वष्टारूपाणिपिंशतु आसिंचतुप्रजापतिर्धातागर्भंददातुते गर्भंदेहिसिनी
वालीगर्भंदेहिसरस्वती गर्भंदेत्वाश्विनौदेवावाधत्तांपुष्करस्रजं इतिकुंडगोलादिशोध
नं अथमांसादीनांशापहरीविद्या ॐप्लूं ष्लूं म्लूं न्लूं येजंतुसः अमृतेअमृतोद्भवेअमृतेश्व
र्यमृतंस्रावय २ स्वाहा इतिमांसादीनामपरिशापहरींत्रिःपठेत् इतिमांसादिसंशोध
सर्वांशंश्रीपात्रेनिक्षिप्य श्रीपात्रोपरिहूमित्यवगुंठ्यामृतीकृत्य तालत्रयेणदिशःसंबद्ध्य
तदुपरिमत्स्यधामूलंसंजप्य तत्रश्रीदेवीमावाह्य तालत्रयेणदिग्बंधनंविधायावगुंठ्य ।
योनिंप्रदर्श्य कुंडलिन्याःप्रयोगेनराजदंतवर्त्मनानिःसृतामृतधारांयोनिमुद्रोल्लासि
तेनकरेणानीय मूलविद्यांतेमूलं ॐब्रह्मांडखंडसंभूतमशेषरससंभवं आपूरितमहापा
त्रंपीयूषरसमावह १ ऐं अखंडैकरसानंदकरेपरसुधात्मनि स्वच्छंदस्फुरणामत्रनिधेह्य

कुलरूपिणि २ क्लीं अकुलस्यामृताकारे सिद्धिज्ञानकरे परे अमृतत्वं निधेह्यस्मिन्वस्तुनि क्लिन्न
रूपिणि ३ ऐं अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय २ ॐ जुं सः स्वाहा
इत्यभिमंत्र्य सौः तद्रूपेणैकरस्यं च कृत्वा ह्येतत्स्वरूपिणि भूत्वा परामृताकारं मयि चित्स्फुरणं
कुरु इत्यभिमंत्र्य ह्स्रौः नमः इति संपूज्य शंखवन्मुद्रां प्रदर्श्य षडंगेन सकलीकृत्य मत्स्यमुद्रया
पात्रमाच्छाद्य मूलं दशधा जप्त्वा पात्रे देवीरूपं भावयेत् इति विशेषार्घ्यपात्रस्थापनविधिः तत
स्तत्परतस्तेनैव विधिना श्रीपात्रं स्थापयेत् तेनैव मूलदेवीमतिरिक्तावरणदेवतास्तर्पयेत् ॥
पूजासमर्पणादिकं मूलदेवीतर्पणं च विशेषार्घ्येणैव तत्र अनंगकुसुमादि पर्यंतमावरणपू-
जासमर्पणमर्घ्यदानं सामान्यार्घ्यजलेनैव कुर्यात् इति श्रीपात्रस्थापनविधिः तदनु क्रमेणै
वदेव्याज्ञामादाय घटसमीपे गुरुपात्रं ततः शक्तिपात्रं भोगपात्रं स्वपात्रं योगिनीपात्रं वीरपा
त्रं वलिपात्रं पाद्यपात्रं अर्घ्यपात्रं आचमनीयपात्रं मधुपर्कपात्रं इत्येतानि पात्राणि संस्थाप्य च
र्वणाद्युत्कारणेन वामहस्तेन कृततत्त्वमुद्रया श्रीपात्रात्समुद्धृत्य ऐं आनंदभैरवं तर्पयामि नमः ऐं
सुरादेवीं तर्पयामि नमः इति त्रिः स्वललाटमध्ये संतर्पयेत् ततः श्रीगुरुं गुरुपात्रामृतेन स्वशि
रसि गुरुमंत्रं पठित्वा श्रीमच्छ्रीस्वामिप्रतापकौलानंदनाथपादुकां श्रीदयाम्बा श्रीपादुकां
पू० त० ऐं परमगुरुः श्रीमच्छ्रीस्वामिमहानंदकौलानंदनाथश्रीपा० पू० त० श्रीभागव

श्री·
२७

त्यंबा श्रीपा० पू० त० ऐं परमाचार्यगुरुः श्रीमच्छ्रीकौलगोविंदानंदनाथश्रीपा० पू० त० ।
श्रीशारदांबा श्रीपा० पू० त० नमः ऐं परमेष्ठिगुरुः श्रीमच्छ्रीस्वामिज्योतिष्प्रकाशकौलानंद
नाथश्रीपा० पू० त० श्रीभगवतीअंबाश्रीपा० पू० त० नमः ऐं दिव्यौघगु० ऐं सिद्धौघगु० ऐं
मानवौघगु० ततः विशेषार्घ्यपात्रामृतेन ओं ऐं ह्रीं श्रीं मूलं श्रीमच्छ्रीमहात्रिपुरसुंदरीसायु
धां सवाहनां सपरिकरां समुद्रां तर्पयामि नमः इति स्वहृदि संतर्प्य प्रोक्षणीपात्रं संस्थाप्य
विशेषार्घ्यबिंदुना संस्कृत्यात्मानं संप्रोक्षयेत् तेनैव जलेन यथा ऐं प्रथमकूटं आत्मतत्त्वा
त्मने नमः क्लीं द्वितीयं विद्यातत्त्वात्मने नमः सौः तृतीयं शिवतत्त्वात्मने नमः ऐं क्लीं सौः मू
लं सर्वतत्त्वात्मने नमः इति स्वात्मानं प्रोक्ष्य मूलेन यागभूमिमुपकरणानि च प्रोक्षेत् तस्मा
त् सर्वं ब्रह्ममयं भवेत् सर्ववस्तुषु येन मुद्रां प्रदर्शयेत् इति कलशस्थापनविधिः अथात्म
पूजा पुरतस्त्रिकोणमंडलस्योपरि पात्रं संस्थाप्य कलशोदकेनापूर्य विशेषार्घ्यबिंदुं दत्वा
स्वदेहं गंधादिनालंकृत्य आत्मानं देवीरूपं भावयेत् श्रीगुरुगणेशपरदेवताः प्रणम्य मूला
दिब्रह्मरंध्रांतं कुंडलिनीं बिसतंतुतनीयसीं चंद्रकोटिप्रभाद्रवां मनोलयपर्यंतं ध्यात्वा परा
नंदनिर्भरस्यंदात्मकत्वेन मूलविद्यामपि मूलादिब्रह्मरंध्रांतं तेजोमयीं विभाव्य तत्तेजसाप
रिणतेष्टदेवतारूपं स्वदेहं विभावयन् आत्मपूजां कुर्यात् प्रागुक्तयोगपीठविधिना स्वदेहं

सिंहासनत्वेन परिकल्प्य शिरसि ॐ श्रीगुरुपादुकांउच्चार्य श्रीमच्छ्रीस्वामिप्रतापकौलानंदना
थश्रीपादुकांपूजयामि नमः इति संपूज्य २ मूलाधारे ॐ गणपतिश्रीपादुकांपूजयामि नमः इति
संपूज्य योगपीठन्यासक्रमेण मंडुकाद्यान्मूलाधारादितत्तत्स्थानेषु सिंहासनांतान्संपूज्य दक्ष
वामांसदक्षवामोरुसर्वांगेषु पंचप्रेतासनं संपूज्य दक्षांसादिषु धर्मादिचतुष्टयं संपूज्य हृदये मा
याविद्ये संपूज्य मध्ये पंचदशफणान्वितमनंतं ध्यात्वा तन्मध्यकोणे अष्टदलकमले कामेश्वरी
पीठं ध्यात्वा अनंतपद्मादिपरतत्त्वांतं संपूज्य तत्केसरेषु प्रागादिप्रादक्षिण्येन ॐ माहिनीश्रीपा
दुकांपूजयामि नमः ॐ क्षोभिणीश्रीपादुकां ॐ वज्रिणीश्रीपादुकां ॐ स्तंभिनीश्रीपादुकां ॐ
आकर्षिणीश्रीपादुकां ॐ द्राविणीश्रीपादुकां ॐ आह्लादिनीश्रीपादुकां ॐ क्लिन्नाश्रीपादुकां
इति संपूज्य मध्ये ॐ क्लेदिनीश्रीपादुकांपूजयामि नमः इति संपूज्य ह्रीं सर्वशक्तिकमलासनाय
नमः इति पुष्पांजलिना स्वदेहं संपूज्य तन्मध्यकर्णिकायां श्रीचक्रं विभाव्य ॐ समस्तप्रकटगुप्त
गुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यपरापररहस्यातिरहस्ययोगिनीचक्रपादुकाभ्यो नमः
इति स्वदेहं संपूज्य प्रागुक्तयोगिनीपीठन्यासक्रमेण षडासनपर्यंतं प्राग्विन्यस्तस्थानेषु संपू
ज्य दक्षांसे ॐ नादशक्तिश्रीपादुकांपूजयामि नमः दक्षा ॐ बिंदुशक्तिश्रीपा॰ दक्ष
शंखे ॐ कलाशक्तिश्रीपा॰ दक्षललाटे ॐ ज्येष्ठाशक्तिश्रीपा॰ दक्षनेत्रे ॐ रौद्रीशक्तिश्रीपा॰

श्री०
२८
28

दक्षकर्णे ॐ वामाशक्तिश्रीपा० दक्षनासायां ॐ विघ्नशक्तिश्रीपा० हृदये ॐ सर्वानंदशक्ति
श्रीपा० इतिसंपूज्य अंकेकेंगंचंडं इत्यादितः शर्यंतं शिवशक्तिसदाशिवेश्वरशुद्धविद्यामाया
कलाविद्यारागकालनियतिपुरुषप्रकृत्यहंकारबुद्धिमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पा
णिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवायुवह्निसलिलपृथिव्यात्मतेषट्त्रिंशत्तत्त्व
पायश्रीमहात्रिपुरसुंदरीयोगपीठायनमः इतिसर्वांगंसंपूज्य हृत्कमलेभगवतींध्यायेत्त
त्तेजसावाप्तंस्वदेहेश्रीदेवीरूपंविभाव्य ॐ मूलं श्रीमहात्रिपुरसुंदरीश्रीपादुकांपूजयामि
नमः तर्पयामिनमः इतिशिरसि पुष्पांजलिनात्रिःसंपूज्य पुरःस्थापितपात्रोदकबिंदुभिः
संतर्प्य पुनःप्राग्वन्मूलेनशिरोहृदयगुह्यपादद्वयसर्वांगेषु पंचपुष्पांजलिभिःसंपूज्य
संतर्प्य हृदयत्रिकोणेलयांगतिथिनित्याषोडशनित्यागुरुपंक्तित्रयषडंगयुवतीस्तत्तत्स्था
नेषुवक्ष्यमाणविधिनासंपूज्यसंतर्प्य हृदयत्रिकोणपूजायांसंहारक्रमेणनवावरणश
क्तीःशिरःत्रिकोणपूजायां सृष्टिक्रमेणनवावरणशक्तीश्चक्रेश्वरीश्चपूजयेत्तर्पयेत् ॥
ततःसर्वपुष्पांजलिपंचकंस्वदेहेमस्तकादिस्थानेषुविधाय धूपदीपौनिवेद्य अंतर्हवनं
कुर्यात् तत्रमूलाधारेचतुरस्रंचित्कुंडंविभाव्य तन्मध्येकालाग्निमेववासनेंधनज्वालि
तंप्राणादिसंधुक्षितंकुंडलिनीरूपदेवताधिष्ठितंचिदग्निमंडलंविभाव्य ॐ धर्माधर्मह

विद्दीप्तेस्थात्माग्नौ मनसा स्रुचा सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहा इति पुण्य
पापकृत्याकृत्यसंकल्पधर्माधर्मात्मकं हविः सम्यक् हुत्वा ॐ प्रकाशाकाशहस्ताभ्यामवलं
ब्योन्मनीस्रुचं धर्माधर्मकलास्नेहपूर्णां वह्नौ जुहोम्यहं स्वाहा अधर्मं जुहोमि स्वाहा इति
पूर्णां हुत्वा निरस्ताखिलप्रपंचनिष्कलब्रह्मरूपः साधकः कियत्क्षणं तिष्ठेत् श्रीदेवी
रूपमात्मानं ध्यात्वा श्रीगुरुं प्रणम्य शिरस्यब्जपूर्णां ध्यात्वा तन्मंत्रेणैव संपूज्य शिवपूजाव
शिष्टं तत्पात्रस्थमुदकं गुरुपादुकाविद्याभ्यां कुंडलिन्यात्मकश्रीपरदेवतामुखे जुहोमी
ति हुत्वा मुद्राद्वितीयखंडेन सह प्राश्य श्रीपरदेवतारूपमात्मानं ध्यायेत् प्राणायामादि
पूर्वकं मूलं यथाशक्ति जप्त्वा पुनः प्राणायामादिना जपं समर्प्य स्तुत्वा प्रणमेदित्यात्मपू
जा ततः पंचमयागं हृदयामलोक्तं विधाय ततः पीठार्चा अथ योगपीठपूजा तत्र सामान्या
र्घोदकेन श्रीचक्रमभ्युक्ष्य स्ववामतः पीठोपरि ऐं ऐं ह्रीं श्रीं श्री गुरुपादुकामुख्याचार्य श्रीमच्छ्री
स्वामिप्रतापकौलानंदनाथश्रीपादुकां पूजयामीति संपूज्य दक्षभागे ॐ गं गणपतिश्री
पा० इति संपूज्य सर्वाधःस्थादारभ्योपर्युपरि मंडूकाय नमः कालाग्निरुद्राय नमः मूलप्र
कृत्यै नमः आधारशक्त्यै० कूर्माय० अनंताय० वाराहाय० पृथिव्यै० इति संपूज्य पृथ्व्यां ॐ
इक्षुरससमुद्राय० मदिरासमुद्राय० घृतसमुद्राय० दधिसमुद्राय० इति संपूज्य ॥:

श्री. तन्मध्ये स्रं ५० नवखंडविराजिताय नवरत्नद्वीपाय तत्पश्चिमे स्रां दें पुष्परत्नाय नै-
२९ र्ऋते ल्रं ॐ वैडूर्यरत्नाय दक्षिणे ॐ कं ॐ नीलरत्नाय आग्नेये चं ॐ विद्रुमरत्नाय पूर्वे टं ॐ
मौक्तिकरत्नाय ईशाने तं ॐ मरकतरत्नाय उत्तरे पं ॐ वज्ररत्नाय नमः वायव्ये यं ॐ गो
मेधरत्नाय मध्यखंडे ॐ शं ॐ पद्मरागरत्नाय तन्मध्यखंडमध्ये स्वर्णपर्वताय तदुपरि नं
दनोद्यानाय तन्मध्ये कल्पवृक्षेभ्यः तन्मध्ये वसंतादिषड्ऋतुभ्यो नमः तत्पश्चिमे इंद्रिया
श्वेभ्यो० तत्पूर्वे इंद्रियार्थगजेभ्यो० तन्मध्ये विचित्ररत्नभूमिकायै तत्पश्चिमे कालचक्रे
श्वर्यै नैर्ऋते मुद्राचक्रेश्वर्यै दक्षिणे मातृचक्रेश्वर्यै आग्नेये रत्नचक्रेश्वर्यै पूर्वे देशच
क्रेश्व ईशाने गुरुच० उत्तरे ॐ तत्वचक्रेश्वर्यै ॐ वायव्ये ग्रहचक्रेश्वरी मध्ये ॐ मूर्तिच
क्रेश्वरी इति संपूज्य ततस्तत्सिंहासनं पंचप्रेतमयं ध्यात्वा वायव्यादिकोणचतुष्टयगता
पादाश्रयत्वेन स्थितान् ब्रह्मविष्णुरुद्रेश्वरान्सहस्रार्कप्रभांश्चतुर्भुजानुपविष्टांस्तेषां स्कं
दे संलग्नमुत्तानशायितमुदकशीर्षं सदाशिवं सिंदूरप्रभं च ध्यात्वा वायव्ये लां पृथिव्यधि
पतये ब्रह्मणे नमः ब्रह्मप्रेतासनश्रीपादु० ईशाने वां अपामधिपतये विष्णवे नमः विष्णु
प्रेतासनश्रीपादु० आग्नेये रां तेजोधिपतये रुद्राय नमः रुद्रप्रेतासनश्रीपा० नैर्ऋते यां वा
य्वधिपतये ईश्वराय नमः ईश्वरप्रेतासनश्रीपा० मध्ये ह्सौंः वियदधिपतये सदाशिवाय न०

सदाशिव श्रीमहाप्रेतासनश्रीपादुं इति संपूज्य कल्पतरोरुपरिष्टात् स्वर्णप्राकाराय तन्म
ध्ये मणिमंडपाय तस्य नैरृत्यादि कोणचतुष्टये वामावर्त्तेन कालरूपिणीशक्त्यै देशरूपिणी
श० आकाशरूपिणीश० शब्दरूपि० मध्ये संगीतभोगिनीभ्यो नेत्रेवसमस्तप्रकटगुप्तसिद्धयो
गिनीचक्रेभ्यो तन्मध्ये मणिमयवेदिकायै तदुपरि श्वेतच्छत्राय तदधः रत्नसिंहासनाय।
श्रीचक्राधारपीठं रत्नसिंहासनत्वेन परिकल्प्य तस्य वायव्ये धर्माय नैरृते ज्ञानाय आग्ने
ये वैराग्याय ईशाने ऐश्वर्याय तस्य पश्चिमे अधर्माय दक्षे अज्ञानाय पूर्वे अवैराग्याय उत्त
रे अनैश्वर्याय तन्मध्ये मायायै विद्यायै तदुपरि पंचदशाक्षरविराजितायानंताय नमः
इति संपूज्य तत्र षट्त्रिंशत्तत्वात्मकं श्रीचक्रं ध्यात्वा तदुपरि ओं ५० शिवशक्तिसदाशि
वेश्वर शुद्धविद्यामायाकलाविद्यारागकालनियतिपुरुषप्रकृत्यहंकारबुद्धिमनः श्रो
त्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवाय्वग्निस
लिलपृथिव्यात्मने श्रीमहात्रिपुरसुंदर्यायोगपीठासनाय नमः इति समस्तपीठं पुष्पां
जलिना संपूज्य ततस्तदुपरि प्रसन्नतलिकां कल्पयामीति मध्ये पुष्पं निक्षिप्य तदुपरि ऐं
ह्रीं श्रीं सौः श्रीमहात्रिपुरसुंदर्याः ॥ सकलचैतन्यानंदमयीं श्रीकामेश्वरकामेश्वरीमूर्त्तिं कल्प
यामीति पुष्पादिप्रक्षेपेण ध्यानोक्तां मूर्त्तिं भावयन् शक्तिपुत्थापनमुद्रां प्रदर्श्य मूलमुच्चार्य ॥
परस्यै कामेश्वरकामेश्वरीमूर्त्यै नमः इति कल्पितमूर्त्तिं पूजयेदिति योगपीठपूजा अथ

श्री· श्रीचक्रपूजा तत्र प्रागेव श्रीगुरुं शिरसि संपूज्य नमोऽस्तु गुरवे इत्यादिना संपूज्य श्रीगुरो द
२० क्षिणामूर्ते भक्तानुग्रहकारक अनुज्ञां देहि भगवन् श्रीचक्रयजनाय मे इति श्रीगुर्वाज्ञा
30 मादाय प्राणायाम षडंगादि विधाय मातृकां भोजकत्वेन कल्पयित्वा त्रिखंडां बद्ध्वा हृदि।
श्रीचक्रे देवीं यथोक्तरूपां सपरिवारां ध्यात्वा तेजोरूपामाद्यंतमुद्राप्रयोगेन मूलाधारात्कुं
डलिनीमुत्थाप्य तया सह षट्चक्रभेदक्रमेण हृदयांतःस्फुरंतीं तां तेजोरूपां सुषुम्णा
मार्गेण ब्रह्मरंध्रं नीत्वा परतेजःसंगमेनामृतमहांबुधौ क्षणं विश्रम्य शिवशक्तिसामर
स्यमनुभूय मूलं ॐ देवेशि भक्तिसुलभे सर्वावरणसंवृते यावत्त्वां पूजयिष्यामि ताव
त्त्वं सुस्थिरा भव वहन्नासाध्वना त्रिखंडामुद्राकरस्थपुष्पांजलौ तत्तेजः समानीय।
कल्पितमूर्तेः शिरसि सन्निवेश्य सर्वावयवभावेन भावयन् मूलं इहागच्छ २ इह संति
ष्ठ २ इह सन्निधेहि २ इह संनिरुध्यस्व २ इह सन्मुखी भव २ इह अवगुंठिता भव २ सक
लीकृत्यामृतीकृत्य परमीकृत्य इत्यावाहनादिमुद्राः प्रदर्श्य मूलेन मातृकपादेवीत्रिः
प्रोक्ष्य प्राणप्रतिष्ठां कुर्यात् ऐं श्रां ह्रीं क्रौं यं रं लं वं शं षं सं हं हौं हंसः सोहं श्रीत्रिपुरसुंद
र्याः प्राणा इह प्राणाः ॐ श्रीमहात्रिपुरसुंदर्या जीव इह स्थितः ॐ सर्वेंद्रियाणी इह स्थिता
नि ॐ वाङ्मनस्त्वक्चक्षुर्जिह्वाश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा प्राण
प्रतिष्ठां विधाय मूलेन पुष्पांजलिभिः त्रिः संपूज्य विशेषार्घ्यबिंदुभिः संतर्प्य आसनाद्यु

पचारैः प्रतयेत् मूलं श्री महात्रिपुरसुंदरि तुभ्यमासनं कल्पयामि नमः पुष्पांजलिः मूलं पाद्यं
कल्पयामि नमः मूलं अर्घ्यं कल्पयामि स्वाहा पुष्पांजलिः मूलं आचमनीयं कल्पयामि स्वधा मू
लं एवं मधुपर्कं कल्पयामि स्वधा पुनराचमनीयं पुष्पांजलिः वैदिकपौराणिकैः मंत्रैः पंचा
मृतैः पंचगव्यैः स्नपयित्वा मूलेन चरणोदकं गृहीत्वा तदष्टांगं यथा वचाकर्पूरकस्तूरीकुं
कुमागुरुचंदनं श्रीचक्रं कांस्यपात्रं च अष्टांगं चरणोदकं ब्रह्माविष्णुरुद्रसोमसूर्यपुरंद
राः षडेते शाक्तिकश्रेष्ठा गृह्णंतु चरणोदकम् इति तेभ्यो भागं दद्यात् वस्त्रं भूषणं मूः गंधं
समर्पयामि नमः मूः पुष्पाणि वौषट् मूः धूपपात्रं प्रोक्षामृतीकृत्य तत्पुरुषाय विद्महे व
क्रतुंडाय धीमहि तन्नो दंती प्रचोदयात् ॐ भास्कराय विद्महे सहस्ररश्मये धीमहि तन्नः सू
र्यः प्रचोदयात् ॐ नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् शिवा
शक्त्योः मूलगायत्री वनस्पतिरसोत्पन्नो गंधाढ्यो गंध उत्तमः आघ्रेयः सर्वदेवानां धूपोऽयं
प्रतिगृह्यतां जगतध्वनिमयं मंत्रमातः स्वाहा इति घंटामभिमंत्र्य अस्त्रेण गंधादिना सं
पूज्य तां वामहस्तेन वादयन् धूपं निवेदयेत् तथैव दीपपात्रं संस्कृत्य मूलं पूर्ववन्मूलगा
यत्री स्वप्रकाशो महादीपः सर्वतस्तिमिरापहः सबाह्याभ्यंतरं ज्योतिर्दीपोऽयं प्रतिगृह्यतां
स्वर्णादिपात्रेण नानानैवेद्यं निधायास्त्रेण प्रोक्ष्यामृतीकृत्य वायुवीजं जप्त्वा ७ मूलं हेम

श्री० पात्रगतं दिव्यं परमान्नं सुसंस्कृतं पंचधाषड्रसोपेतं गृहाण परमेश्वरि मूलं सांगा
३१ येसायुधायैसपरिवारायैसशिवायैसर्वात्मिकायै भगवत्यै इदं नैवेद्यं निवेदयामि नमः
पात्रांतरे जलमस्ती कृत्य ॐ अमृतोपस्तरणमसि स्वाहा इति देवीहस्ते चुलुकं दत्वा प्रा
णादिमुद्राः प्रदर्श्य ५ पं प्राणाय स्वाहा क्लीं अपानाय स्वाहा सौः व्यानाय स्वाहा पंक्लीं उ
दानाय स्वाहा क्लीं सौः समानाय स्वाहा ग्रासमुद्राः प्रदर्श्य ततो वैश्वानरं ध्येत् १ आत्मतत्वव्यापि
काश्रीमहात्रिपुरसुंदरी तृप्यतु इत्येवं २ विद्यातत्व ३ शिवतत्व समस्तसर्वतत्वव्या
पि इति श्रीदेवी भुंजानां ध्यात्वा मूलं यथाशक्ति जप्त्वा पात्रांतरे जलमस्ती कृत्य ॐ अ
मृतापिधानमसि स्वाहा इति श्रीदेवीहस्ते उत्तरापोशानं दत्वा मूलेन ततो हस्ते संशोध्य
मोदय वनस्पति देवताय तांबूलायनमः मूलं तांबूलं गृहाण स्वाहा योनिमुद्रया प्र
णम्य पुष्पांजलिना संपूज्य मूलेन सुप्रसन्नां श्रीमहात्रिपुरसुंदरीं पूजयामि नमः गंधा
दिना संपूज्य सुप्रसन्नां विभाव्य नमस्कारमुद्रया प्रणम्य मूलं संपूदितमातृकया त्
गंधपुष्पादिभिः संपूज्य सकलीकृत्य श्रीदेवीं त्रिः संतर्प्य आवरणपूजां कुर्यात् कृतांज
लिः मूलं संविन्मये परे देवि परामृतरुचिप्रिये अनुज्ञां त्रिपुरे देहि परिवारार्चनाय मे
इत्यनुज्ञां प्रार्थ्य श्रीचक्रदेवतां यजेत् तत्रादौ विंदुचक्रे मूलं ऐं अं मूलपंचदशीश्रः

महात्रिपुरसुंदरीनित्याश्रीपादुकां पूजयामि तर्पयामि नमः अत्र तिथिनित्यां तर्पयेत् त्रिकोणे
वामावर्तेन अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं इति संपूज्य पंचदशनित्याः पूजयेत् ६ ह्रीं
श्रीं अं कामेश्वरीनित्य प्रतिपत्तिथि नित्याश्रीपादुकां पूजयामि तर्पयामि नमः १ ह्रीं श्रीं आं भग
मालिनी नित्याश्रीपादु० पू० त० नमः २ ह्रीं श्रीं इं नित्यक्लिन्ना नित्याश्रीपा० पू० त० नमः ३ ह्रीं
श्रीं ईं भेरुंडा नित्याश्रीपादु० पू० त० नमः ४ ह्रीं श्रीं उं वह्निवासिनी नित्याश्रीपा० पू० नमः ५
ह्रीं श्रीं ऊं महावज्रेश्वरी नित्याश्रीपा० पू० त० नमः ६ ह्रीं श्रीं ऋं शिवादूती नित्याश्रीपा० पू० त०
नमः ७ ह्रीं श्रीं ॠं त्वरिता नित्याश्रीपा० पू० त० नमः ८ ह्रीं श्रीं लृं कुलसुंदरी नित्याश्रीपा० पू० त० ९
ह्रीं श्रीं ॡं नित्या नित्याश्रीपा० पू० त० १० ह्रीं श्रीं एं नीलपताका नित्याश्री० ११ ह्रीं श्रीं ऐं विजया नि-
त्याश्री० १२ ह्रीं श्रीं ओं सर्वमंगला नित्याश्री० १३ ह्रीं श्रीं औं ज्वालामालिनी नित्याश्री० १४ ह्रीं श्रीं अं
चित्रा नित्याश्रीपा० पू० त० नम १५ इति वामावर्तेन संपूज्य श्रीपात्रामृतेन तर्पयेत् मध्ये विं
दुचक्रे विसर्गस्वरं विभाव्य अः मूले अः श्रीमहात्रिपुरसुंदरीनित्याश्रीपादु० पू० त० ततः तुर्य
विद्यां अः महासप्तदशीकलातीता नित्याश्री० इति पूजांशं तर्प्य कलातीतां नित्यां संपूज्य
विशेषार्घ्येण संतर्प्य पुनः प्राग्वत् तिथिनित्यां संपूज्य तिथिनित्याये गंधादि निवेद्य तत्तिथिनै
वेद्यं निवेद्य गुरुपंक्तित्रयं पूजयेत् अथ प्रथमं मूलेन मूलदेवीं संपूज्य संतर्प्य श्रीदेव्या।

श्री. पृष्ठभागे रेखात्रयं विभाव्य तत्राधोधः क्रमेण गुरुपंक्तित्रयं पूजयेत् यथा ॐ ऐं दिव्यौघे
३२ भ्यः परापरेभ्यो गुरुभ्यो नमः इति पुष्पांजलिं दत्वा ऐं परशिवानंदनाथश्रीपादुकां पूजया
32 मि तर्पयामि नमः कामेश्वर्यादि ॐ श्रीदेव्यंबा दिव्यश्रीपादु. ॐ दिव्यौघानंदनाथश्रीपादु.
ॐ महौघानंदनाथश्री. ॐ सर्वानंदनाथश्री ॐ प्रज्ञादेव्यंबाश्री ॐ प्रकाशानंदनाथश्री.
इति प्रथमरेखायां दिव्यौघः द्वितीय ॥२ रेखायां ऐं सिद्धौघेभ्यः परापरेभ्यो गुरुभ्यो
नमः इति पुष्पांजलिं दत्वा ॐ देव्यानंदनाथश्री. ॐ चिदानंदनाथश्री ॐ कैवल्यानंदना
थश्री ॐ देव्यंबाश्री ॐ महोदयानंदनाथश्री इति सिद्धौघः इति पंक्तिक्रमेण संपूज्य श्री
गुरुपात्रामृतेन संतर्प्य तृतीयरेखायां ऐं मानवौघेभ्यो परापरेभ्यो गुरुभ्यो नमः इति पुष्पां
जलिं दत्वा ॐ चिदानंदनाथश्री ॐ विमृशज्ञानंदनाथश्री ॐ परमानंदनाथश्री ॐ क
मलानंदनाथश्री ॐ परानंदनाथश्री ॐ महोदरानंदनाथश्री ॐ स्वात्मानंदनाथश्री ॐ
प्रतिभानंदनाथश्री अत्र स्वगुरुपंक्तिः ऐं ॐ श्रीमहायाददेवानंदनाथश्री ॐ श्रीम
दाह्लाददेवानंदनाथश्री ॐ श्रीशिवानंदमणिरामवाजपेयानंदनाथश्री ॐ श्रीमच्छ्री
स्वामिज्ञानानंदनाथश्री ॐ श्रीमच्छ्रीस्वामिसाहिबकौलानंदनाथश्रीपा ॐ श्रीमत्स्वामि
ज्योतिष्प्रकाशकौलानंदनाथश्री ॐ श्रीमद्गोविंदकौलानंदनाथश्री. ॐ श्रीमच्छ्रीस्वा

मिमहानंदकौलानंदनाथश्रीपा० ऐं श्रीमच्छ्रीस्वामिप्रतापकौलानंदनाथश्रीपा० इतिगुरुपं
क्तिपूजा अथषडंगयुवतीपूजा तत्रमध्यत्रिकोणाद्बहिः आग्नेये ऐं सर्वज्ञाहृदयशक्तिश्री०।
नैरृते ह्रीं नित्यतृप्ताशिरशक्तिश्रीपा० पू० त० नमः वायव्ये सौः अनादिबोधाशिखाशक्तिश्री०
ईशाने ऐं स्वतंत्राख्यकवचशक्तिश्री० देव्यग्रे त्रिकोणाद्बहिः ऐं ह्रीं नित्यमलुप्तानेत्रशक्ति
श्री० पूर्वादिचतुर्दिक्षु प्रादक्षिण्येन सौः अनंतास्त्रशक्तिश्री० त० नमः इतिषडंगयुवतीपूजा
अत्रदेव्यग्रेप्राचीवायव्यकोणमेवाग्नेयकोणमित्यादिज्ञेयं अथनवावरणपूजा तत्रमूलंस
मस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यपरापररहस्यातिरहस्ययोगिनी
श्रीचक्रपादुकाभ्यः० त० नमः इतिचक्रेपुष्पांजलिंदत्वा मातृकाक्षरैर्मंडितंशुक्लारुणपी
तवर्णविचित्ररत्नखचितंसमस्तस्थलरूपंचतुरश्रत्रयंध्यात्वा अं आं सौः त्रैलोक्यमोहन॰
चक्रायनमः इतिचतुरश्रेसमुदायेनपुष्पांजलिनासंपूज्य पुनस्तत्रआद्यरेखायैनमः ॥
इतिपुष्पांजलिनासंपूज्य तस्यदेव्यग्रादिद्वारचतुष्टयेदेवीदक्षिणाग्रादिकोणचतुष्टये इंद्रे
शानयोर्मध्ये निरृतिवरुणयोर्मध्ये अणिमादिदशशक्तीः पाशांकुशपद्मद्वयकरारक्ताव
र्णाः शशिशेखरानिधिवाहनस्याध्यात्वा तत्रपश्चिमादिद्वारचतुष्टयस्यदक्षभागेन ऐं अ
णिमासिद्धिश्री० ऐं लघिमासिद्धिश्री० ऐं महिमासिद्धिश्री० ऐं ईशित्वसिद्धिश्रीपा० पू० त० नम :

श्री· ततोवायव्यादिकोणेषु ॐ वशित्वसिद्धिश्री· ॐ प्राकाम्यसिद्धिश्री ॐ भुक्तिसिद्धिश्री ॐ इच्छा
३३ सिद्धिश्री ॐ निरृतिवरुणयोर्मध्ये प्राप्तिसिद्धिश्री· ॐ इंद्रेशानयोर्मध्ये सर्वकामसिद्धिश्रीपा·पू·
33 त· ततश्चतुरश्रमध्यरेखायै नमः इतिसंपूज्य ततोरक्तोत्पलकपालहस्तानीलवस्त्राभरणा
बाल्याद्यष्टमातॄर्ध्यात्वावामभागेषु द्वाराणांआग्नेयकोणेषुच पार्श्वयोरीशा ॐ आंब्राह्मी
श्रीपा·पू· ईंमाहेश्वरीश्री· ऊंकौमारीश्री ॠंवैष्णवीश्री ॐ लृंवाराहीश्री· ऐंइंद्राणीश्री· औं
चामुंडाश्री· अः महालक्ष्मीश्रीपा·पू·त· नमः ततश्चतुरश्रेरेखायै नमः इतिसंपूज्य
पाशांकुशस्वस्वमुद्रांकितचतुर्भुजारक्ताः सालंकारादशमुद्रादेवीर्ध्यात्वा प्रथमरेखा-
ग्रादक्षिणेपितृपूजयेत् द्रांसर्वसंक्षोभिणीमुद्राश्रीपा·पू·त· नमः द्रींसर्वविद्राविणीमु
द्राश्री· क्लींसर्वाकर्षिणीमुद्राश्री· ब्लूंसर्ववशंकरीमुद्राश्री· सःसर्वोन्मादिनीमुद्राश्री· क्रों
महांकुशामुद्रा· ह्स्रैंहसकलरीं ह्स्रौं त्रिखंडा· ह्स्रौः बीजमुद्रा॰ ऊर्ध्वेहसखफ्रें खेचरीमु
द्रा· अधःऐंयोनिमुद्राश्री·पा·पू·त· नमः इतिसंपूज्य श्रीपात्रामृतेनतर्पयेत् अणिमासि
द्धेरग्रभागेषुत्तकालरक्तपद्मद्वयकरांस्फटिकाभांमुक्ताभरणांत्रिपुराचक्रेश्वरीश्री॰ इति
चक्रेश्वरींसंपूज्य तस्यावामेद्रांसर्वसंक्षोभिणीमुद्रांप्रदर्श्यगंधाक्षतकुसुमान्वितंसामान्या
र्घोदकंगृहीत्वा एताःप्रकटयोगिन्यस्त्रैलोक्यमोहनेचक्रेसमुद्राःससिद्धयःसायुधाःस

वाहनाः सपरिवाराः सर्वोपचारैः पूजितास्तर्पिताः संतु नमः इति चक्रेश्वर्या वामहस्ते जलदा
नेन पूजां समर्प्य मूलविद्यया मूलदेवीं संपूज्य संतर्प्य पुष्पांजलिमादाय मूलं श्रीमहात्रिपुरसुंद
रि अभीष्टसिद्धिं मे देहि शरणागतवत्सले भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनं इति देव्याश्च
रणयोः पुष्पांजलिं दत्वा प्रकटयोगिनीमयूखायै श्रीमहात्रिपुरसुंदर्यै नमः इति योनिमुद्र
या प्रणामेत् इति प्रथमावरणपूजा ततः षोडशदले पूर्णचंद्रनिभे ध्यात्वा स्ववत्सीपूर्वं च ऐं
क्लीं सौः सर्वाशापूरकचक्राय नमः इति पुष्पांजलिं निक्षिप्य तत्र पाशांकुशास्त्रपूर्णास्फटि
कचषकरांकितकराः सुसूक्ष्माः पीयूषवर्षिणीर्ध्यात्वा देव्यग्रदलमारभ्य वामावर्तेन षोडश नि
त्याः कलाः पूजयेत् ऐं अं कामाकर्षिणीनित्याश्रीपा· पू· त· नमः ऐं आं बुद्ध्याकर्षिणीनित्या
श्री· पू· त· ऐं इं अहंकाराकर्षिणीनित्याश्रीपा· पू· त· ऐं ईं शब्दाकर्षिणीनित्याश्रीपा· पू· त· ऐं
उं स्पर्शाकर्षिणीनित्याश्रीपा· पू· त· ऐं ऊं रूपाकर्षिणीनित्याश्रीपा· ऐं ऋं रसाकर्षिणीनि
त्याश्री· ॠं गंधाकर्षिणीनित्याश्री· ऌं चित्ताकर्षिणीनित्याश्री· ॡं धैर्याकर्षिणीनित्याश्री·
एं स्मृत्याकर्षिणीनित्याश्री· ऐं नामाकर्षिणीनित्याश्री· ओं बीजाकर्षिणीनि· औं आत्माकर्षि
णीनित्याश्री· अं अमृताकर्षिणीनित्याश्री· अः शरीराकर्षिणीनित्याश्री· १६ इति संपूज्य का
माकर्षिणीप्रभृतीः पाशांकुशवराभयहस्ताः प्रभावराभरणा रत्नमुकुटा त्रिपुरेश्वरीं ध्यात्वा

श्री· ४५ ऐं क्लीं सौः त्रिपुरेश्वरीचक्रेश्वरीश्रीपा· पू· त· नमः तस्या वामे ह्रीं सर्वविद्राविणीमुद्राश्री·
तद्दक्षे लघिमासिद्धिश्रीपा· इति संपूज्य श्रीपात्रबिन्दुभिः संतर्प्य ह्रीमिति मूलदेव्यै सर्ववि-
द्राविणीमुद्रां प्रदर्श्य सामान्यार्घ्योदकं गृहीत्वा ॐ एता गुप्तयोगिन्यः सर्वाशापूरके चक्रे स
मुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः पूजितास्तर्पिताः संतु नमः
इति चक्रेश्वरीवामहस्ते जलदानेन पूजां समर्प्य मूलदेवीं संपूज्य विशेषार्घ्योदकेन सं
तर्प्य पुष्पांजलिमादाय मूलं श्रीमहात्रिपुरसुंदरि अभीष्टसिद्धिं मे देहि शरणागतव
त्सले भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनं इति देव्याश्चरणयोः पुष्पांजलिं दत्वा गुप्त
योगिनीमयूखायै श्रीमहात्रिपुरसुंदर्यै नमः इति योनिमुद्रया प्रणमेत् इति द्वितीयावर
णपूजा २ ततोऽष्टदलकमलं जपाकुसुमप्रभं ध्यात्वा ह्रीं क्लीं सौं सर्वसंक्षोभणचक्राय न
मः इत्यष्टदले पुष्पांजलिं क्षिपेत् तत्र पाशांकुशनीलरत्ननीलोत्पलकरा रक्तवर्णा
अनंगकुसुमाद्या अष्टसिद्धीर्ध्यात्वा श्रीदेव्याः पृष्ठभागस्थसर्वदलमारभ्य दिग्दलचतु
ष्टये प्रादक्षिण्येन ॐ कं ॐ अनंगकुसुमाश्रीपा· पूजयामि नमः तर्पयामि नमः ॐ चं ॐ
अनंगमेखलाश्रीपा· पू· त· ॐ टं ॐ अनंगमदनाश्रीपा· पू· त· ॐ तं ॐ अनंगमदनातुरा
श्रीपा· पू· त· नमः आग्नेये पं ॐ अनंगरेखाश्री· नैरृते यं ॐ अनंगवेगिनीश्री· वायव्ये

ग्रं ३ं अनंगांकुशाश्री· ईशाने लंदं: अनंगमालिनीश्री· इति संपूज्य श्रीपात्रविंदुभिः संत
र्प्य अनंगमदनातुरतः रक्तवर्णां सर्वालंकारभूषितां पुस्तकाक्षमालावराभयकरां ध्यात्वा
ह्रीं क्लीं सौः त्रिपुरसुंदरीचक्रेश्वरीश्री· इति चक्रेश्वरीं संतर्प्य तस्या वामे क्लीं सर्वाकर्षिणीमु
द्राश्री· तद्दक्षे महिमासिद्धिश्री इति संपूज्य ॥ श्रीपात्रविंदुभिः संतर्प्य क्लीं मिति सर्वाकर्षि
णीमुद्रां प्रदर्श्य एता गुप्ततरयोगिन्यः सर्वसंक्षोभकारके चक्रे समुद्राः इत्यादिना सामान्या
र्घोदकेन चक्रेश्वरीहस्ते पूजां समर्प्य मूलेन मूलदेवीं संपूज्य संतर्प्य पुष्पांजलिना मूलं
श्रीमहात्रिपुरसुंदरि अभीष्टसिद्धिं मे देहि शरणागतवत्सले भक्त्या समर्पये तुभ्यं तृतीयाव
रणार्चनं इति संपूज्य गुप्ततरयोगिनीमयायै श्रीमहात्रिपुरसुंदर्यै नमः इति योनिमुद्रया
प्रणमेत् इति तृतीयावृत्तिपूजा ततश्चतुर्दशारे दाडिमीकुसुमप्रभे ध्यात्वा हैं ह्क्लीं ह्सौः सर्वसौ
भाग्यदायकचक्राय नमः इति चतुर्दशारे पुष्पांजलिं दत्वा तत्र रक्तवर्णाः सर्वाभरणभूषिताः
पाशांकुशदर्पणपानपात्रकराश्चतुर्दश शक्तीर्ध्यात्वा देव्यग्रकोणमारभ्य वामावर्तेन ऐं कं
सर्वसंक्षोभिणीशक्तिश्रीपा· पू· त· ऐं खं सर्वविद्राविणीशक्ति ऐं गं सर्वाकर्षिणीशक्ति ऐं
घं सर्वाह्लादिनीशक्तिश्री ङं सर्वसंमोहिनीशक्तिश्री चं सर्वस्तंभिनीश· छं सर्वजृंभिणीश
क्तिश्री जं सर्ववशंकरी झं सर्वरंजिनीश· ञं सर्वोन्मादिनीश· टं सर्वार्थसाधिनीश ठं सर्व

श्री. संपत्पूरणीशक्ति ठंसर्वमंत्रमयीशक्ति डंसर्वद्वंद्वक्षयंकरीशक्ति इतिसंपूज्य श्रीपा
३५ त्रविंदुभिः संतर्प्य सर्वसंक्षोभिणीशक्त्यग्रे रक्तवर्णां पुस्तकाक्षमालावराभयकरां त्रिपुर
वासिनीं ध्यात्वा हैं ह्क्लीं ह्सौं त्रिपुरवासिनीचक्रेश्वरीश्री तस्यावामे द्रांवश्यमुद्राश्री तद्दक्षे
ईशित्वसिद्धिश्री इतिसंपूज्य श्रीपात्रविंदुभिः संतर्प्य द्रामितिवश्यमुद्रां प्रदर्श्य एताः सं
प्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे समुद्राइत्यादिना विशेषार्घ्यजलेन चक्रेश्वरी
हस्ते पुष्पं समर्प्य मूलेन मूलदेवीं संपूज्य विशेषार्घ्येण संतर्प्य पुष्पांजलिना मूलं श्री
महात्रिपुरसुंदरि अभीष्टसिद्धिमित्यादि चतुर्थावरणार्चनमिति समर्प्य संप्रदाययोगि
नीमहाबोधे श्रीमहात्रिपुरसुंदर्यै नमः इतियोनिमुद्रया प्रणमेत् इतिचतुर्थावरणपू
जा ततो बहिर्दशारं सिंदूरवर्णं ध्यात्वा ह्सैं ह्सक्लीं ह्सौः सर्वार्थसाधकचक्राय नमः इ
ति पुष्पांजलिं निक्षिप्य तत्र जपाकुसुमवर्णाः पाशांकुशालंकारपेटीहस्ताः सर्वाभरण
भूषिताः शुक्लवर्णा दशदेवीर्ध्यात्वा देव्यग्रकोणमारभ्य वामावर्तेन ठं णं सर्वसिद्धिप्र
दादेवीश्री तं सर्वसंपत्प्रदादेवीश्री थं सर्वप्रियंकरीदेवीश्री दं सर्वमंगलकारिणीश्री।
धं सर्वकामप्रदादेवीश्री नं सर्वदुःखविमोचिनीश्री पं सर्वमृत्युप्रशमनीदेवीश्री फं स
र्वविघ्नविनाशिनीदेवीश्री बं सर्वांगसुंदरीश्री भं सर्वसौभाग्यदायिनीदेवीश्री इतिदश

35

देवीः संपूज्य श्रीपात्रबिंदुभिः संतर्प्य सर्वसिद्धिप्रदाचक्रे उद्यद्भानुसहस्रकांतिसर्वालंकारभू
षितां मदाघूर्णनेत्रत्रयां पुस्तकाक्षमालावराभयकरां त्रिपुराश्रीचक्रेश्वरीं ध्यात्वा ह्सैं ह्स्क्लीं
ह्सौः त्रिपुराश्रीचक्रेश्वरीश्री तस्या वामे सः सर्वोन्मादिनीमुद्राश्री तद्दक्षे वशित्वसिद्धिश्री
इति संपूज्य श्रीपात्रबिंदुभिः संतर्प्य सः सर्वोन्मादिनीमुद्रां प्रदर्श्य ततः कुलकौलयोगि
न्यः सर्वार्थसाधके चक्रे समुद्राः इत्यादिना विशेषार्घ्यजलेन चक्रेश्वरीहस्ते पूजां समर्प्य मूले
न मूलदेवीं संपूज्य संतर्प्य मूलं श्रीमहात्रिपुरसुंदरी अभीष्टसिद्धिमित्यादि पंचमावरणा
र्चनमिति श्रीदेव्यै पुष्पांजलिं समर्प्य कुलकौलयोगिनीमयूखाद्यै श्रीमहात्रिपुरसुंदर्यै।
नमः इति योनिमुद्रया प्रणमेत् इति पंचमावरणम् ५ ततोंतर्दशारचक्रं जपाकुसुमवा
र्णं ध्यात्वा ॐ ह्रीं क्लीं ब्लूं ह्रीं ऐं ह्रीं क्लीं ह्रीं सौः ब्लूं सर्वरक्षाकरचक्राय नमः इति पुष्पांजलिं नि
क्षिप्य तत्र बालार्कवर्णाः पाशांकुशज्ञानमुद्रावरकरा मुक्ताविभूषणा दशदेवीर्ध्यात्वा देव्य
ग्रकोणमारभ्य वामावर्तेन ॐ मं सर्वज्ञादेवीश्री· यं सर्वशक्तिदेवीश्री रं सर्वैश्वर्यप्रदादेवीश्री
लं सर्वज्ञानमयीदेवीश्री वं सर्वव्याधिविनाशिनीदेवीश्री· शं सर्वाधारस्वरूपादेवीश्री· षं स
र्वपापहरादेवीश्री· सं सर्वानंदमयीदेवीश्री· हं सर्वरक्षास्वरूपिणीश्री· क्षं सर्वेप्सितफलप्र
दादेवीश्री· इति दशदेवीः संपूज्य श्रीपात्रबिंदुभिः संतर्प्य सर्वज्ञादेव्याद्ये रक्तवर्णपाशांकुश

श्री· ३६ कपालाभयधारिणीं त्रिपुरामालिनीं ध्यात्वा ॐ ह्रीं क्लीं ब्लूं ह्रीं ऐं ह्रीं क्लीं ह्रीं सौः ब्लूं त्रिपुरमा
लिनीचक्रेश्वरीश्री तस्या वामे क्रौं महांकुशामुद्राश्री तद्दक्षे प्राकाम्यसिद्धिश्री इति संपूज्य
क्रोमिति महांकुशामुद्रां प्रदर्श्य एतान् निगर्भयोगिन्यः सर्वरक्षाकरे चक्रे समुद्रा इत्यादि चक्रे
श्वरीहस्ते विशेषार्घ्योदकेन पूजां समर्प्य मूलेन मूलदेवीं संपूज्य संतर्प्य मूलं श्रीमहात्रि
पुरसुंदरि अभीष्टसिद्धिं मे देहि इत्यादि षष्ठमावरणार्चनं इति देव्यै पुष्पांजलिं दत्वा समर्प्य
निगर्भयोगिनीमयूरवायै श्रीमहात्रिपुरसुंदर्यै नमः इति योनिमुद्रया प्रणमेत् इति षष्ठा
वरणपूजा ६ ततोष्टारचक्रं पद्मरागप्रभं ध्यात्वा ह्रीं श्रीं सौं सर्वरोगहरचक्राय नमः ॥
इति पुष्पांजलिं निक्षिप्य तत्र रक्तवर्णा रक्तवसनाभरणानुलेपना पंचबाणधनुःपुस्त
कवरकराष्टवाग्देवता ध्यात्वा देव्यग्रकोणमारभ्य वामावर्तेन ॐ अं १६ ह्लूं वशिनीवा
ग्देवताश्री· ॐ कं ॐ ह्लूं कामेश्वरीवाग्देवताश्री· चं ॐ न्लीं मोदिनीवाग्देवताश्री· टं ॐ
ह्लूं विमलावाग्देवताश्री· तं ॐ ज्मीं अरुणावाग्देवताश्री· पं ॐ ह्सवल्र्यूं जयिनीवा
ग्देवताश्री· यं ॐ फ्मर्यूं सर्वेश्वरीवाग्देवताश्री· शं ॐ ह्म्जीं कौलिनीवाग्देवताश्री इति सं
पूज्य श्रीपात्रविंदुभिः संतर्प्य वशिन्यग्रे शुभ्रवर्णां पाशांकुशकपालाभयधारिणीं त्रिपु
रासिद्धाचक्रेश्वरीं ध्यात्वा ह्रीं श्रीं सौः त्रिपुरासिद्धाचक्रेश्वरीश्री· पा· तस्या वामे ह्सखफ्रें

चरीमुद्राश्री॰ तद्वद्दे भुक्तिसिद्धिप्रीइतिसंपूज्य श्रीपात्रविंदुभिः संतर्प्य हसखफ्रें इति खेचरीमुद्रां
प्रदर्श्य एतां रहस्ययोगिन्यः सर्वरोगहरे चक्रे समुद्रा इत्यादिना चक्रेश्वरीहस्ते विशेषार्घोदकेन पू
जां समर्प्य मूलेन मूलदेवीं संतर्प्य संपूज्य मूलं श्रीमहात्रिपुरसुंदरि अभीष्टसिद्धिमित्यादि स
मस्तावरणार्चनमिति देव्यै पुष्पांजलिं दत्वा पूजां समर्प्य रहस्ययोगिनीमघ्रावाघे श्रीमहात्रि
पुरसुंदर्यै नमः इति योनिमुद्रया प्रणमेत् इति समस्तावरणपूजा ८ ततोंतस्त्रिकोणं वंधूककु
सुमारुणं ध्यात्वा हस्रैं हसक्लीं हसौः सर्वसिद्धिप्रदचक्राय नमः इति पुष्पांजलिं ध्यात्वा निक्षि
प्य तत्र त्रिकोणाष्टकोणयोरंतराले वायव्यादीशानांतकोणचतुष्टये वामावर्तेन रक्तवर्णा
वराभयकरा नवरत्नविभूषणाः स्वायुधभूषितमस्तकाः यौवनोन्मत्तविग्रहा ध्यात्वा ऐं
यां रां लां वां सां द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां सां जंभणकामेश्वरबाणदेवताश्री॰ द्रां द्रीं क्लीं ब्लूं सः
यां रां लां वां सां द्रां द्रीं क्लीं ब्लूं सः जंभणकामेश्वरीबाणदेवताश्री १ ऐं यां रां लां वां सां थं धं यां
रां लां वां सां मोहनकामेश्वरचापदेवताश्री ऐं द्रां द्रीं क्लीं ब्लूं सः थं धं द्रां द्रीं क्लीं ब्लूं सः मोहना
कामेश्वरीचापदेवताश्री २ ऐं यां रां लां वां सां ह्रीं श्रां यां रां लां वां सां वशीकरणकामेश्वरपाश
देवताश्री॰ द्रां द्रीं क्लीं ब्लूं सः ह्रीं श्रां द्रां द्रीं क्लीं ब्लूं सः वशीकरणकामेश्वरीपाशदेवताश्रीपा॰ यां
रां लां वां सां क्रों यां रां लां वां सां स्तंभनकामेश्वरांकुशदेवता श्रीपाष्ट॰ न॰ द्रां द्रीं क्लीं ब्लूं सः क्रों

श्री·

द्रां द्रीं क्लीं ब्लूं सः स्तंभनकामेश्वर्यंकुशदेवताश्रीपा·पू·त· इत्यायुधदेवताः संपूज्य संतर्प्य त्रिको
णेवामावर्तेन कामेश्वर्यादिदेवीत्रयं पूजयेत् तत्राग्रकोणे स्फुरत्कां स्फुरत्कांचनादिभूषणामिक्षु
धनुःपुष्पबाणपुस्तकाक्षमालाधरां त्रिनेत्रां चंद्रचूडां कामेश्वरीं ध्यात्वा प्रथमकूटमग्नि।
चक्रे कामरूपपीठे मित्रेशनाथात्मिके जाग्रद्दशाधिष्ठायिके इच्छाशक्त्यात्मक रुद्रात्म
शक्तिश्रीकामेश्वरीदेवीश्री इति संपूज्य संतर्प्य त्रिकोणस्य वामकोणे नीलवर्णां रक्तवस्त्रा
भरणामिक्षुचापपुष्पबाणवराभयकरां त्रिनेत्रां वज्रेश्वरीं ध्यात्वा द्वितीयकूटं सूर्यचक्रे जा
लंधरपीठे षष्ठीशनाथात्मिके स्वप्नदशाधिष्ठायके ज्ञानशक्त्यात्मकविष्ण्वात्मशक्तिश्री·
वज्रेश्वरीदेवीश्री इति संपूज्य संतर्प्य दक्षकोणे शुभ्रां पाशांकुशजपमालापुस्तककरां
त्रिनेत्रां चंद्रशेखरां भगमालिनीं ध्यात्वा तृतीयकूटं सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथा
त्मके सुषुप्तिदशाधिष्ठायके क्रियाशक्त्यात्मकब्रह्मात्मशक्तिश्रीभगमालिनीदेवीश्री
पा·पू·त·नमः इति संपूज्य श्रीपात्रबिंदुभिः संतर्प्य कामेश्वर्यग्रे उद्यत्सूर्यसहस्राभां त्रि
नेत्रां चंद्रशेखरां रक्तवर्णां रक्तालंकारां पीनोन्नतघनस्तनीं शोणितपंकिलमालाधरां।
पुस्तकाभयजपमालावरकरां त्रिपुरांबिकाचक्रेश्वरीं ध्यात्वा ह्स्रैं ह्स्क्लीं ह्स्रौः त्रिपुरांबिका
चक्रेश्वरीश्री· तस्या वामे ह्स्रौः बीजमुद्राश्री· तद्दक्षे इच्छासिद्धिश्री· इति संपूज्य ह्स्रौः बी

जमुद्रां मूलदेव्यै प्रदर्श्य एताः परापररहस्ययोगिन्यः सर्वसिद्धिप्रदे चक्रे समुद्राः इत्यादिना चक्रे
श्वरीपूजां समर्प्य मूलेन मूलदेवीं संपूज्य मूलं श्रीमहात्रिपुरसुंदरि अभीष्टसिद्धिमित्यादि श्र
ष्टमावरणार्चनमिति पुष्पांजलिना तदावरणपूजां समर्प्य परापररहस्ययोगिनीमयूखायै श्री
महात्रिपुरसुंदर्यै नमः इति योनिमुद्रया प्रणामेत् इत्यष्टमावरणपूजा ततो बिंदुचक्रे परब्रह्मा
त्मकं ध्यात्वा मूलपंचदशीमुच्चार्य सर्वानंदमयचक्राय नमः इति पुष्पांजलिं तिक्षिप्य तत्र म
होड्यानपीठे सार्धसिंहासने स्वसमानाकारकामेश्वरांके स्वस्तिकासनोपविष्टां प्रमुदितां श्री
ललितां यथोक्तरूपां ध्यात्वा तुरीयविद्यामुच्चार्य ब्रह्मरंध्रे उड्यानपीठे श्रीचर्यानाथात्मिके ॥
तुरीयतुरीयातीतदशाधिष्ठायके परब्रह्मात्मशक्ति श्रीमहात्रिपुरसुंदरी देवी श्रीपादुकां पू-
तर्पयामि नमः इति संपूज्य विशेषार्घ्यामृतबिंदुभिः संतर्प्य तस्या वामे ऐं महायोनिमुद्रां श्री·
दद्यात् प्राप्तिसिद्धिश्री ततः ऐं योनिमुद्रां प्रदर्श्य एषा परापरातिरहस्ययोगिनी सर्वानंदमये बिंद
वे महाचक्रे परब्रह्मस्वरूपिणी महामृतशक्तिः सर्वमंत्रेश्वरी सर्वविद्येश्वरी सर्ववीरेश्वरी स
र्वयोगेश्वरी सर्ववागीश्वरी सर्वसिद्धेश्वरी सकलजगदुत्पत्तिमातृका सचक्रा देवता समुद्रा
ससिद्धिः सायुधा सासना सवाहना सपरिवारा सालंकारा सर्वोपचारैः श्रीमहात्रिपुरसुंदरी प
रया चापरया च परापरया च सपर्यया पूजिता तर्पितास्तु नमः इति विशेषार्घ्योदकपुष्पाद्यैः ते

श्री·
३८
38

र्नवमीचक्रेश्वरी हस्लेचक्रपूजां समर्प्य ह्स्रैं ह्सक्लीं ह्सौः इति त्रिखण्डामुद्रां प्रदर्श्य मूलेन
मूलदेवीं संपूज्य संतर्प्य पुष्पांजलिमादाय मूलं श्रीमहात्रिपुरसुंदरि अभीष्टसिद्धिं मे देहि श
रणागतवत्सले भक्त्या समर्पये तुभ्यं नवमावरणार्चनम् इति श्रीदेव्याश्चरणकमले पुष्पांज
लिं निक्षिप्य श्रीपरापरातिरहस्ययोगिनीमयूखायै श्रीमहात्रिपुरसुंदरी श्रीपादुकायै नमः
इति योनिमुद्रया प्रणमेत् अत्र पूजिताः सर्वावरणदेवता देव्याभिमुख्योपविष्टा ज्ञातव्याः ।
इत्थं पूजयित्वा नवचक्रमेकरूपं ध्यायन् सर्वसंक्षोभणादि त्रयोदश मुद्राः प्रदर्श्य विशेषार्घ्या
मृतेन देवीं त्रिः संतर्प्य योनिमुद्रया प्रणमेत् एतन्नवमार्चनं नित्यमावश्यकं अथ चतुःस
मयपूजा तत्र बिन्दुचक्र एव मूलदेव्यग्रे ॐ ऐं क्लीं सौः ॐ नमः कामेश्वरि इच्छाकामफल
दे सर्वसत्त्ववशंकरि सर्वजगत्क्षोभकरि हूं हूं द्रां द्रीं क्लीं ब्लूं सः सौः क्लीं ऐं कामेश्वरी समय
देवता श्रीपा· पू· त· देव्या वामे ऐं ह्रीं सर्वकार्यार्थसाधिनि वज्रेश्वरि वज्रपदे वज्रपंजरमध्य
गे हूं ह्रीं क्लिन्ने ऐं क्रौं नित्यमदद्रवे ह्रीं वज्रनित्यायै नमः वज्रेश्वरी समयदेवता श्रीपा· पू· त·
नमः तद्दक्षे श्रां ऐं भगभगे भगिनि भगोदरि भगमाले भगावहे भगगुह्ये भगयोनि भगनिपा
तिनि सर्वभगवशंकरि भगरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्न
द्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ क्षोभय सर्वसत्त्वान् भगेश्वरि ऐं ब्लूं जं ब्लूं भं ब्लूं सौः ।

ह्लूं नित्यक्लिन्ने सर्वाणि भगानि मे वशमानय ह्रीं हूं ह्लूं ह्रीं श्रां भगमालिनी समयदेवता श्रीपा·

पू· तर्पयामि नमः इति त्रयं पूजयित्वा श्रीपात्रामृतेन संतर्प्य मध्यमूलदेव्यामेव ॐ क्लीं भगवति

ह्लूं नित्ये कामेश्वरि ह्रीं सत्त्ववशंकरि सः त्रिपुरभैरवि विघ्नं विच्चे क्लीं महात्रिपुरसुन्दर्यै नमः श्रीमहा

त्रिपुरसुन्दरी समयदेवता श्रीपा· इति संपूज्य विशेषार्घ्यामृतेन संतर्प्य क्लीमिति शक्तिमुद्रया पत

मुद्रां वद्ध्वा मूलेन प्रदर्श्य ऊमिति संक्षेपेत् इति चतुःसमयपूजा अथ पश्चिमद्वारे ॐ ह्रीं श्रीं· सर्व

योगिनीभ्यः सर्वभूतगणेभ्यः सर्वभूताधिपतिडाकिनीभ्यः शाकिनीभ्यः इमां पूजां गृह्ण गृह्ण

स्वाहा सर्वयोगिनी श्रीपादुकां पूजया· त· नमः ततः पूर्वद्वारे ॐ क्षेत्रपालाय नमः क्षेत्रपाल।

श्रीपादुकां पूज· तर्पयामि नमः दक्षिणद्वारे ॐ श्रीं ह्रीं क्लीं गं गणपतये वरवरद सर्वजनं मे व

शमानय २ स्वाहा उत्तरद्वारे ह्रीं वटुकाय आपदुद्धारणं कुरु २ वटुकाय ह्रीं स्वाहा वटुकभैरव श्री

पादुकां पू· तर्पयामि नमः इति श्रीपात्रविन्दुभिस्तर्पयेत् इति योगिन्यादिपूजा अथाम्नायपू

जा तत्रैव त्रैलोक्यमोहन सर्वाशापूरक संक्षोभकराख्ये सृष्टिचक्रे हसौं सहौं पूर्वाम्नायदेवता

उन्मनी देवी श्रीपा· पू· त· ततश्चान्तर्दशारबहिर्दशारात्मके स्थितिचक्रे ऐं क्लिन्ने क्लीं मदद्रवे कु

ले ह्सौः दक्षिणाम्नायसमयविद्या श्रीपादुकां पू· तर्पयामि नमः ततोऽष्टारत्रिकोणात्मके सं

हारचक्रे हसैं हसक्रौं हसौः ॐ नमो भगवति रुद्धे कुब्जिकायै ह्रां ह्रीं ङं अघोरे घोरे अघोरमु

श्री० खिच्छिंच्छिं किणि किणि विच्चे ह्सौः ह्सखैं श्रीं ह्रीं पश्चिमाम्नायदेवता कुब्जिका देवी श्रीपा
त्रि ९ दुकां पू० त० नमः ततः समष्टिश्रीचक्रे ६ ह्सख्फ्रें महाचण्डयोगेश्वरि उत्तराम्नायाधिदेवता
काली देवी श्रीपा० ततो मूलदेवीमेव प्रथमं संपूज्य संतर्प्य ततो रक्तवर्णामन्नपूर्णां ध्यात्वा
39 स्वर्णदेवीं स्वर्णपात्रां त्रिनेत्रां चन्द्रचूडां च ह्रीं सौः श्रीं क्लीं ॐ नमो भगवति अन्नपूर्णे अ
न्नं मे देहि स्वाहा अन्नपूर्णा सुन्दरी श्री इति संपूज्य विशेषार्घ्यामृतेन संतर्प्य मूलेन मूल
देवीं संपूज्य संतर्प्य मूलदेव्यनुत्तराम्नायदेवता सौः अनुत्तराम्नायदेवता रूपांबा श्रीपा पू०
इति संपूज्य विशेषार्घ्यामृतेन संतर्प्य मूलदेवीं यथोक्तरूपां ध्यात्वा मूलेन संपूज्य तर्पये
त् इत्याम्नायपूजा अथ षड्दर्शनपूजा तत्र त्रैलोक्यमोहने चक्रे चतुरश्रत्रयात्मके ॐ ता
रे तुत्तारे तुरे स्वाहा तारादेव्याधिष्ठितबौद्धदर्शनश्रीपा० १ ततः षोडशदले ॐ ब्रह्मणे नमः ब्र
ह्मदेवताधिष्ठितवैदिकदर्शनश्रीपा० ततोऽष्टदले ॐ हौं शिवाय हौं नमः रुद्रदेवताधिष्ठि २
तशैवदर्शनश्री ३ ततश्चतुर्दशारे ॐ ह्रीं हंसः सूर्यदेवताधिष्ठितसौरदर्शनश्रीपा० ४
ततो दशारद्वये ॐ नमो नारायणाय विष्णुदेवताधिष्ठितवैष्णवदर्शनश्री ५ ततो नवयो
निचक्रे ६ ह्रीं भुवनेश्वरीदेवताधिष्ठितशाक्तदर्शनश्रीपा० ६ इति षड्दर्शनपूजा ततो मूला
ते समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यपरापररहस्यपरापरातिरह

स्थयोगिनीवृंदसंस्थितश्रीचक्रगतसमस्तदेवताश्रीपाः इति पुष्पांजलिं निक्षिप्य पुनर्मूलेनसम
स्तपादिसमस्तदेवताः सर्वोपचारैः पूजितास्तर्पिताः संतु नमः इति पुष्पांजलिं निक्षिप्य श्रीचक्रा
द्बहिरिंद्रादयः शक्तिरूपाः पूज्याः ऐं लं इंद्रशक्तिश्री ऐं रं अग्निशक्तिश्री ऐं टं यमशक्तिश्री ऐं
क्षं निर्ऋतिशक्तिश्री ऐं वं वरुणशक्तिश्री यं वायुशक्तिश्री सं सोमशक्तिश्री हं ईशानशक्तिश्री
इंद्रेशानयोर्मध्ये आं ब्रह्मशक्तिश्री निर्ऋतिवरुणयोर्मध्ये ह्रीं अनंतशक्तिश्री इति दशदिक्षु
संपूज्य तद्बहिरिंद्रादीनां समीपे ऐं वज्रशक्तिश्री शक्तिशक्तिश्री दंडशक्तिश्री खड्गशक्तिश्री
पाशशक्तिश्री ध्वजशक्तिश्री गदाशक्तिश्री त्रिशूलशक्तिश्री पद्मशक्तिश्री चक्रशक्तिश्री ।
इति संपूज्य श्रीपात्रविंदुभिस्तर्पयेत् पुनर्मूलेन मूलदेवीं संपूज्य संतर्प्य पुनर्गंधादिदीपां
तैरुपचारैरुपचर्य प्राभवन्नैवेद्यं निवेद्य कामकलारूपमात्मानं ध्यात्वा मूलं दशधा जप्त्वा
समर्प्य योनिमुद्रया प्रणमेत् नित्यहोमं कुर्यात् तत्र त्रिकोणं चतुरस्रं वा कुंडं विधाय तत्रा
दौ प्राणायामऋष्यादिकरषडंगन्यासध्यानानि विधाय मानसोपचारैः श्रीदेवीमाराध्य
कुंडे स्थंडिले वा त्रिकोणषट्कोणअष्टदलवृत्तचतुरस्रं चक्रं विलिख्य कुंडस्य नैरृते वि
ङ्त्रिकोणवृत्तचतुरस्रं च लिखित्वा तयोराधारशक्तिं संपूज्य नैरृते साधारं पात्रं संस्थाप्य
स्त्रीकृत्यतीर्थान्यावाह्य मूलेन पुष्पत्रयेण संपूज्य तज्जलेनास्त्राय फडिति कुंडादिकं प्रोक्ष्य

श्री· ४०

40

ॐ क्रियाशक्त्यात्मने कुंडाय नमः इति कुंडं संपूज्य तत्र कांस्यादिपात्रेग्निमानीय अग्न्यागारमेकं गृ-
हीत्वा ॐ क्रव्यादेभ्यो हूं फट् स्वाहा क्रव्यादंशं निष्कर्षयामि फट् इति नैर्ऋत्यां दिशि त्यक्त्वा अव-
शिष्टमग्निमस्त्रीकृत्य कुंडोपरि त्रिः परिभ्राम्य मध्ये निक्षिपेत् तत्रागम्यायातादिकं कर्म नि-
त्यहोमे न विद्यते इति वसिष्ठसंहितावचनात् लौकिकाग्निमेव मूलविद्यादिनित्याविद्या-
भ्यामभ्युद्य अभिमंत्र्य स्वचैतन्यानलं तस्मिन् संयोज्य रं अग्नये नमः इति संपूज्य स्रुवेण मूले-
न फूत्कृत्य प्रज्वालयेत् ॐ अग्निं प्रज्वालितं वन्दे जातवेदं हुताशनं सुवर्णवर्णममलं समि-
द्धं सर्वतोमुखं इति प्रणम्य सप्तजिह्वामुद्रां प्रदर्श्य ॐ सकलजगत्कारणवह्ने गर्भाधाना-
दिकाः क्रियाः संपद्यंताम् इत्यग्निमुद्रां प्रदर्श्य प्रणीतापात्रजलेन ॐ फट् शिवाग्निं परिस-
मूहयामि फट् ॐ फडग्निं पर्युक्षामि फट् ॐ फडग्निं परिषिंचामि फट् इति संप्रोक्ष्य ॐ फट् य-
ज्ञस्य संततिरसि यज्ञस्य त्वा संततिं स्तृणामि फट् इति पूर्वे त्रयः दक्षिणे पंच उत्तरे पंच पश्चि-
मे त्रयः इति दर्भान् संस्तीर्य ॐ रं रं रं अग्ने वैश्वानर प्रज्वल प्रज्वल फट् स्वाहा इत्यग्निमावाह्य
अग्निदेवतयोरैक्यं विभावयन् मूले श्रीमहात्रिपुरसुंदर्यै अग्नये नमः इति पुनर्गंधादिना सं-
पूज्य वामे कुशास्तरे स्रुक्स्रुवौ अधोमुखौ संस्थाप्य अभ्युक्ष्य प्रतितप्य दक्षे कुशास्तरे निधाय
शिवाय नमः शक्तये नमः शिवशक्तिभ्यां समालभनं गंधो नमः इति स्रुक्स्रुवौ संपूज्य ।

आज्यस्थालीमग्न्युपरिसंस्थाप्य स्वमंत्रेण संपूज्य ॐमितिदर्भद्वयं दर्भद्वयालमाज्योपरिभ्राम्याग्नौ
निक्षिप्य उत्तराग्रं पवित्रं धृत्वाग्नौ संस्कृत्य नाडीत्रयं ध्यात्वा इडावामापिंगलादक्षादक्षादग्नये स्वाहा
इति वामनेत्रे वामभागाद्धायवे स्वाहा इति दक्षनेत्रे सूर्याय स्वाहा मध्यात् मध्ये मिश्रीकृत्य प्रजा
पतये स्वाहा इति हुत्वा विल्वादिफलं गृहीत्वा आज्यवीक्षणं कुर्याद्यथा ॐ आज्यं तेजः समुद्दि
ष्टमाज्यं पापहरं परं आज्येन सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः दिव्यान्तरिक्षभौमादेर्यत्कि
ल्विषमागते तत्सर्वमाज्यदर्शनेन विनाशमुपगच्छतु आत्मनः वाङ्मनः कायोपार्जितपापनिवा
रणार्थं श्रीमहात्रिपुरसुन्दरीप्रीत्यर्थमिदमाज्यमर्पयामि नमः स्वाहा इत्याज्यवीक्षणं कृत्वा वै
वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय साधय स्वाहा इत्याहुतित्रयं दद्यात्
दक्षे ब्रह्मासनमास्तीर्य आवाहनं तत्र कृत्वा ॐ कृतैतन्नित्यहोमकर्मणि कृताकृतावेक्षकोव
तत्वं ब्रह्मा भवेति संपूज्य ब्रह्मावासनं कुशत्रयं निक्षिप्य तत्र श्रीदेवीमावाहयेत् यथा मूलेन श्रीम
हात्रिपुरसुन्दरी आगच्छ २ संतिष्ठ २ सन्निधेहि २ सन्निरुध्यस्व २ संमुखीभव २ मम सर्वोप
चारसहितां पूजां गृहाण गृहाण वौषट् इत्यग्नौ देवतामावाह्य पाद्यादिभिः सर्वोपचारैः मूलेन च
रुमभिमंत्र्य वामे सुतप्तो भव स्वाहा इत्यग्नौ होमा इति चरौ दक्षे सुशीतो भव स्वाहा इति चरौ होमा इत्यग्नौ
पूर्णाहुतिं दद्याद्यथा मूलेन घृतपूर्णां स्रुचं कृत्वा स्रुवेणाच्छाद्य स्वदेवताध्यानं पठेत् ॥

श्री·
४८
41

स्वाहांतेन मूलेन पूर्णां हुत्वा ॐ प्राणाय स्वाहा अपानाय स्वाहा व्यानाय स्वाहा उदानाय
स्वाहा समानाय स्वाहा इति पंचाहुतीर्हुत्वा मूलं वह्निदेव्योरेकीकारं करोमि स्वाहा इति
पंचविंशत्याज्याहुतीर्जुहुयात् वह्निदेव्योर्नाडीसंधानं करोमि स्वाहा इति नाडीसंधानार्थ
मेकादश गणपत्यादीनां होमं प्राणायामऋष्यादिकरषडंगन्यासान्विधाय मूलेन स्वा
हांतेन षोडशाहुतीर्हुत्वा अथ वामकरेण मालां गृहीत्वा दक्षेण स्रुवं संगृह्य यथाशक्ति
मंत्रहोमं निर्वर्त्य षडंगाहुतीर्जुहुयात् यथा ऐं प्रथमकूटं हृदयाय नमः हृदयशक्त्यै स्वाहा
क्लीं द्वितीयं शिरसे स्वाहा शिरःशक्त्यै स्वाहा सौः तृतीयं शिखायै वषट् शिखाशक्त्यै स्वाहा
ऐं प्रथमं कवचाय हुं कवचशक्त्यै स्वाहा क्लीं द्वितीयं नेत्रत्रयाय वौषट् नेत्रशक्त्यै स्वाहा
सौः तृतीयमस्त्राय फट् अस्त्रशक्त्यै स्वाहा इति हुत्वा आवरणदेवताहोमं कुर्यात् समस्त
प्रकटेत्यादि समष्टिमंत्रेण स्वाहांतेनैकामाहुतिं जुहुयात् तन्तिथिनित्यायै षोडश।
नित्याभ्यो जुहुयात् पूर्णाहुतिं दद्यात् यथा आदौ देवीध्यानं पठित्वा मूलं समस्तप्रकटे
त्ति सर्वमंत्रं पठित्वा न्यूनातिरिक्तमंत्रचक्र त्वमसि स्तुवौषट्स्वाहा इति पूर्णां हुत्वा ॐ गुह्या
तिगुह्यगोप्त्री त्वं गृहाण हवनं मम सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॐ शिवमस्तु
यजमानस्य च्छिद्रं मास्तु कदाचन देवदेव्याः प्रसादेन रक्षतात्त्वमेश्वरं अनेन मंत्रहोम

न श्रीमहात्रिपुरसुंदरी सांगा सशिवा सायुधा सपरिवारा सवाहना समन्त्रा प्रीयतां प्रीता भवतु ।
इति तर्पणं कृत्वा ईशानकोणात्तु वा भस्मोद्धृत्य भस्मतिलकं कुर्यात् यथा ॐ अग्निरिति भस्म ॐ
वायुरिति भस्म ॐ जलमिति भस्म ॐ स्थलमिति भस्म ॐ आकाशमिति भस्म सर्वं भस्म वा
भस्मेदं ॐ शिवमस्तु यजमानस्येति पठं ललाटे भस्मतिलकं कुर्यात् ॐ फडग्निं विमुञ्चामि
ॐ फडग्निं विमोक्ष्यामि फट् ॐ फडग्निं विसर्जयामि फट् इत्यग्निं विसृज्य ततो देवतायै श्रीचक्रेश्व
चाज्यांशं निवेद्य तत्र विधिवद्ध्यात्वाग्निं विसर्जयेद्यथा ॐ नमस्ते मंत्रनाथाय नित्यानंदमयाय च
धर्मार्थकाममोक्षाय युक्तरागमताय च इत्यग्नौ पुष्पं दत्वा संहारमुद्रया वाह्याग्निं स्वात्मनि सं
योज्य मूलेन देव्यै पुष्पांजलिं निवेद्य श्रीदेवीं प्रणमेदिति नित्यहोमविधिः ततः कुरुकुल्लाया
वाराह्याश्च ॐ कुरुकुल्ले ह्रीं मम सर्वजनं मे वशमानय स्वाहा १ वौं वां वाराह्यै नमः २ इति बलि
द्वयं दद्यात् अथ वटुकादिबलिः तत्र श्रीचक्रस्य ईशाने च तु अष्टत्रिकोणात्मकं मंडलं विधा
य तत्र साधारमर्घ्यं सलिलं पात्रं निधाय वां वटुकाय नमः इति संपूज्य ॐ एह्येहि देवीपुत्र वटु
कनाथ कपिलजटाभारभास्वर त्रिनेत्रज्वालामुख सर्वविघ्नान्नाशय २ मम सर्वोपचारसहि
तं बलिं गृह्ण २ स्वाहेति वामांगुष्ठानामिकाभ्यां बलिं दद्यात् इति वटुकबलिः आग्नेये तथैव
मंडलं कृत्वा साधारं तत्र पात्रं निधाय यां योगिनीभ्यो नमः ऊर्ध्वं ब्रह्मांडतो वा दिवि गगनतले भू

श्री॰ तलेतिस्तलेवा पातालेवानलेवा सलिलपवनयोर्यात्रकुत्रस्थितावा क्षेत्रपीठोपपी
४२ ठादिषुचकृतपदाधूपदीपादिकेन प्रीतादेव्यःसदानःशुभवलिविधिनापांतुवीरेंद्रवंद्याः
यांयोगिनीभ्यःसर्ववर्णयोगिनीभ्योहूंफट्स्वाहा इतिवामांगुष्ठमध्यमानामाभिर्वलिमु
त्सृजेदितियोगिनीवलिः २ नैरृते क्षांक्षेत्रपालायनमः क्षांक्षींक्षूंक्षैंक्षौंक्षः स्थानक्षे
त्रपालाधूपदीपादिसहितंवलिंगृह्ण २ स्वाहा योस्मिन्क्षेत्रेनिवासीच क्षेत्रपालःसकिं
करः सप्रीतोवलिदानेनसर्वरक्षांकरोतुमे इतिवामांगुष्ठतर्जनीभ्यांबलिमुत्सृजेत्।
इतिक्षेत्रपालवलिः ३ वायव्ये गांगणपतयेनमः गांगींगूंगैंगौंगः गणपतयेवरवरदसर्वज
नंमेवशमानयवलिंगृह्ण २ स्वाहा इतिवामांगुष्ठमध्यमाभ्यांवलिमुत्सृजेदितिगणप
तिवलिः उत्तरे सर्वभूतेभ्योनमः ॐह्रींसर्वविघ्नकृद्भ्यःसर्वभूतेभ्यः हूंफट्स्वाहा सर्वभूते
भ्यःएषवलिर्नमः इतिसर्वांगुलीभिर्वलिमुत्सृजेदितिभूतवलिः ५ अशक्तएकपात्रेव
लिपंचकंदद्यात् अस्मिन्नेवावसरे छागादिवलिंदद्यात् तत्रपशुंमूलेनसुस्नाप्य गंधस्र
गादिभिरलंकृत्य श्रीदेव्यग्रेसंस्थाप्य मूलेनप्रोक्षणीजलेनप्रोक्ष्यास्त्रेणसंरक्ष्य कवचेना
वगुंठ्य मूलेनधेनुमुद्रयामृतीकृत्य ऐं सर्वदेवतारूपिणेबलिरूपायामुकपशवेनमः
इतिगंधादिनात्रिःसंपूज्य तत्कर्णे ॐपशुपाशायविद्महे विश्वकर्मणेधीमहि तन्नोजी

42

वः प्रचोदयात् इति पशुगायत्रीं त्रिः पठित्वा ऐं ॐ ह्रीं हूं फट् शिवस्वरूपं गच्छतु स्वाहा ७ ऐं ॐ
जूंसः हसखफ्रें हसरवलमलवयूं शिवस्वरूपं गच्छतु स्वाहा ७ पुनः खड्गं निधाय ॐ ह्रीं कालिकालिवज्रे
श्वरि लोहदंडायै नमः इति गंधादिना त्रिरभ्यर्च्य तस्य पृष्ठे ऐं वागीश्वरीब्रह्मभ्यां नमः मध्ये ऐं
लक्ष्मीनारायणाभ्यां नमः अग्रे ऐं उमामहेश्वराभ्यां नमः इति संपूज्य तं धृत्वा मंत्रयेत् ॐ ख
ड्गाय खरनाशाय देवकार्यार्थतत्पर पशुश्छेद्यस्त्वया शीघ्रं खड्गनाथ नमोस्तु ते इत्यभिमंत्र्य गं
धाक्षतजलादिकमादाय मूलमद्यामुकमासस्येत्यादि अमुकगोत्रोमुकशर्मा अमुकका
मः श्रीत्रिपुरसुंदरि इमं पशुं तुभ्यमर्पयाम्यहं संप्रसीद इति पठित्वा पशोः शिरसि निक्षिप्य ।
तच्छिरो धृत्वा ॐ यज्ञार्थं पशवः सृष्टा यज्ञार्थे पशुघातनं अतस्त्वां घातयिष्यामि तस्माद्यज्ञे
वधोवधः शिवायत्तमिदं पिंडमतस्त्वं शिवतां गतः उद्बुध्यस्व पशो त्वं हि नाशिवस्त्वं शिवोसिहि
इति संबोधयित्वा खड्गमादाय सौंः अस्त्राय फट् छिंधि छिंधि स्वाहा इति खड्गं तस्य स्कंधे योज
येत् ततः स्वयं देवीरूपो भूत्वा निर्विकल्पएकेन प्रहारेण छिंद्यात् अत्रैव ब्राह्मणव्यतिरिक्तः स्व
स्वादि बलिं दद्यात् इति बलिं दत्वा मूलदेवीं संपूज्य स्वर्णादिपात्रस्थं जलमञ्जलीकृत्य मूलेन
त्रिरभिमंत्र्य मूलं श्रीमहात्रिपुरसुंदरीपादुकायै समर्पयामि नमः इति समुत्सृज्य सलिलं पा
वनं देवि शीतलं सुमनोहरं मया निवेदितं भक्त्या गृहाण परमेश्वरि इति देव्या वामे निवेदयेत्

श्री. मूले श्रीमहात्रिपुरसुंदरित्र्यामीति ज्ञात्वा स्वर्णादिपात्रस्थं अमृतमानीय धेनुमुद्रया अमृती
४३ कृत्य मूलेनाभिमंत्र्य ॐ अमृतापिधानमसि स्वाहा इति देव्या हस्ते किंचिन्निवेद्य तयाप्राशितं
विभाव्य गतसारं नैवेद्यमुद्धृत्य नैर्ऋत्यां संस्थाप्य अग्नेय्यां स्थानं संशोध्य हस्तप्रक्षालनजलं द
त्वा सुगंधादि च दत्वा पुनर्हस्तप्रक्षालनजलं दत्वा सुगंधजलेन गंडूषाणि कारयित्वा चरणौ
प्रक्षाल्य वस्त्रेण करचरणयोर्जलमपनीय सुगंधेन करौ सुरभीकृत्य सुगंधानुलेपनमा
ल्यानि समर्प्य तांबूलं प्रभवद्दत्वा सुप्रसन्नः पूजां कुर्यात् मूलं सुप्रसन्ना श्रीमहात्रिपुरसुं
दरी श्रीपादुकां पूजयामि नमः इति पुष्पांजलिभिः संपूज्य मूलं सुप्रसन्नार्घे श्रीमहात्रिपु
रसुंदरी श्रीपादुकार्घे अर्घं कल्पयामि स्वाहा इत्यर्घं दत्वा गंधादि पूजां प्राग्वन्निवेदयेदिति
प्रसन्नपूजा ततः आरात्रिका स्वर्णादिपात्रे सिंदूरादिना अष्टदलं निर्माय तत्रमध्ये दलाष्टके
च यवपिष्टादिरचितानि नवदीपपात्राणि संस्थाप्य घृतेनापूर्य कर्पूरादिवर्तिका निक्षिप्य
भुवनेश्वर्या प्रज्वाल्य श्रीं ह्रीं ग्लूं स्लूं म्लूं प्लूं न्लूं ह्रीं श्रीं इति नवरत्नेश्वरी विद्यया त्रिरभिमंत्र्य
चक्रमुद्रां प्रदर्श्य रत्नेश्वरी विद्यां पुनरुच्चार्य रत्नेश्वरी श्रीं इति संपूज्य मूलेन मूलदेवी आरा
त्रिकायां संपूज्य पात्रमामस्तकमुद्धृत्योत्थाय घंटावादनपूर्वं देव्या मस्तकादिपादांतं ९ मू
लेन समस्तचक्रचक्रेशी युते देवि नवात्मके आरात्रिकमिदं देवि गृहाण मम सिद्धये इति

43

पठन्देव्यामस्तकोपरि त्रिस्त्रिर्भ्रामणपूर्वं नवकृत्वो नीराजयेदिति सामान्यारात्रिकाविधिः त
तः कुमारीपूजनक्रमेण मूलेन पूजयेत् तत्रादौ सर्वांगसंपूर्णां कुमारीमानीय तस्याः पादौ प्रक्षा
ल्य सूक्ष्मवस्त्रेण मार्जयित्वा पूजापीठे समुपवेश्य तस्याः पादौ पुनः प्रक्षाल्य मंत्राक्षरमयीं
लक्ष्मीं मातृकारूपधारिणीं नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं इति मस्तकोपरिपु
हित्वा बालाविद्यामुच्चार्य श्रीकुमारी श्री इति कुमारीपादौ संपूज्य ३ पुनर्मूलेन गंधादिदीपा
न्तैरुपचारैः संपूज्य मूलदेवीं तत्र ध्यात्वा पुष्पैर्ध्यानेन संपूज्य आचमनं भोजनं ततो मूलवस्त्रा
दिदक्षिणां च समर्प्य तस्यै शक्तिपात्रं निवेदयेद्विसृजेदिति कुमारीपूजनं श्रीमद्गुरवे गुरु।
पात्रं तदभावे तत्पुत्राय तत्पत्न्यै वा तदभावेपि श्रीगुरुपादुकां तत्स्वशिरःस्थायगुरवे निवेदये
त् मूलेन मूलदेव्यै पुष्पांजलिं निवेद्य प्राणायामं कृत्वा षडंगन्यासान्विधाय श्रीदेवीं ध्यायन्
दीक्षाविधिना जपं विधाय सामान्यार्घ्यजलेन ॐ गुह्येति देव्या वामहस्ते तेजोमयं जपफलं।
समर्प्य मालां संपूज्य रहःस्थाने स्थापयेत् ततो मूलेन श्रीदेव्यै पुष्पांजलित्रयं दत्त्वा कवचसह
स्रनामस्तोत्रपाठं विरचय्य घंटावादनपूर्वं देवीस्तोत्रं पठेत् ॐ श्रीमच्छ्रीकोशस्फुरद्दधे पंचसिंहा
सनात्मकं फलं कल्पलतानां चचारुरत्नस्फुरत्करं चतुर्थायतनातें दिव्यतरन्वयकोशगं ति
स्रानंदपरंब्रह्मलयामनोमिश्रवामये गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीं देवीं मंत्रमयीं

श्री·
५५

नौमातृकांपीठरूपिणीम् प्रणमामिमहादेवींमातृकांपरमेश्वरीं कालहल्लहल्लोल्लोल
कलनाशमकारिणीं यदक्षरैकमात्रेणसंसिद्धेःस्पर्धतेनरः रविताक्ष्यैन्दुकंदर्पशंकरान
लविष्णुभिः यदक्षरशशिज्योत्स्नामंडितंभुवनत्रयं वंदेसर्वेश्वरींदेवींमातृकांसिद्धमातृ
कां यदक्षरमहासूत्रेप्रोतमेतज्जगत्त्रयं ब्रह्मांडादिकटाहांतंतांवंदेसिद्धमातृकां यदेकाद
शमाधारवीजंकोणत्रयोद्भवं ब्रह्मांडादिकटाहांतंजगदद्यापिदृश्यते अकचादिटतोन्न
उपयशाक्षरवर्गिणीं ज्येष्ठांगबाहुहृत्पृष्ठकटिपादनिवासिनीम् तामीकाराक्षरोद्धारांसा
रात्सारांपरात्परां प्रणमामिमहादेवींपरमानंदरूपिणीं अद्यापियस्याजानंतिनमनागपि
देवताः केयंकस्मात्क्वकेनेतिसरूपारूपभावनां वंदेतामहमक्षय्यक्षकाराक्षररूपिणी
म् देवींकुलकलोल्लोलप्रोल्लसंतींपरांशिवां वर्गानुक्रमयोगेनयस्यांमात्राष्टकंस्थितं वंदे
तामष्टवर्गोत्थमहासिद्ध्यष्टकेश्वरीं कामपूर्णजकाराख्यश्रीपीठांतर्निवासिनीम् चतुराज्ञा
कोशभूतां नौमिश्रीत्रिपुरामहं एवंद्वादशभिःश्लोकैःस्तवनंसर्वसिद्धिकृत् देव्याअखंड
रूपायाःस्तवनंतवतद्यतः इतिस्तुत्वापुष्पांजलिमादाय अन्यैश्चवैदिकैःपौराणिकैर्मंत्रैः
स्तवैश्चस्तुत्वा देव्याश्चरणयोःक्षिपेत् ततःप्रार्थनमुद्रांबद्ध्वा प्रार्थनस्तवंपठेत् किंकिंदुः
खंदनुजदलनिक्षीयतेनस्मृतायां काकाकीर्तिःकुलकमलिनिप्राप्यतेनस्तुतायां का

कामसिद्धिःस्तवरत्नेनाप्यते नार्चितायां कंकेयोगंत्वयित्त्वचित्तते चिन्तमालेवितायां सर्गासंस

र्गसंरंभस्फारितात्माथविभ्रमे चिच्चन्द्रमंडलांतःस्थेतमस्तेहरवल्लभे जगदाह्लादनोद्योतयोगाभो

गावियोगिनि स्थितिभावात्स्थितेगौरि नमः स्थाणुप्रियेविके भावाभावस्थभावस्वधर्मोदय

रूपिणि चैतन्यपंचकेदेविनमस्तेभ्यंहरांगने सृष्टिस्थित्युपसंहारप्रस्फुरत्पदोदये चिद्दीप्ता

तमहासत्तामात्रेमात्रेनमोस्तुते वह्न्यर्कशीतकिरणप्रसलचक्रांतरोदिते चतुष्पीठेश्वरेदेवितस

त्त्रिपुरसुंदरि चराचरमिदंविश्वंप्रकाशयसिपासि च मातृकारूपमास्थायतस्यैमातर्नमोस्तुते

स्तुतासिभवभयेहेसिपूजितासिशुभंकरी स्तुतात्वंवांछितंवस्तुदयासिकरुणाकरे भक्तस्यमे

नित्यपूजाप्रक्रमस्यपरमेश्वरि वाग्भवादिमहासिद्धिंदेहित्रिपुरसुंदरि परमानंदसंदोहप्रमोद

भरनिर्भरे दुःखत्रयपरिम्लानवदनंपाहिमांशिवे प्रोद्यद्बालमयेस्वच्छेदेवित्रिपुरसुंदरि यथा

शक्तिजपपूजांगृहाणमदनुग्रहात् द्रव्यहीनंक्रियाहीनंमंत्रहीनंवपुश्चवेत् सर्वंतत्क्षमया

देवित्वमस्वपरमेश्वरि यन्मयाक्रियतेकर्मजाग्रत्स्वप्नसुषुप्तिषुतत्सर्वंतावकीपूजाभूयाद्भूत्यै

नमःशिवे यन्मयोक्तमिहाज्ञानात्तन्महत्स्वल्पमेववा हेतत्सर्वंजगद्धात्रिदंतत्क्षमयमेञ्जलिः

द्वैताद्वैतमहामोहशर्वरीक्षपणक्षमः भास्वान्निर्वैसकोणेशःशक्तिसंयुतः प्रतिभासाग

रोल्लासोनिशाकरइवापरः मूर्तिप्रक्तःसजयतिवटुकस्ताण्डवान्वितः षट्त्रिंशत्तत्त्वभरितं

श्री· देवेंद्रैःपाल्यसत्पले देवेशंतमहंनौमिवारुणाख्येमहाबले चतुष्पीठनिवासिन्योयोगीश्व
४५ र्योमहाबलाः चतुःषष्टिप्रकारास्तास्तास्संवेदेकुलागताः भेदाभेदमहामोहविवर्तपरिमंडि
ताम् आश्रयेत्तीसमयांद्वात्रिंशार्णांतमाम्यहं इतिस्तुत्वापुष्पांजलिंकृत्वा प्राग्उक्तस्तोत्रेण
पिशुंस्तुत्वाप्रणम्य सर्वशक्तिक्रमोद्भूतप्रभुस्तोहमिहात्मिकां देवस्यदेवतांकांचित्संवि
त्त्वमयींश्रये इत्युच्चरन्नमस्कारमुद्रांप्रदर्श्य प्रदक्षिणानिकृत्वा ॐसर्वमंगलमंगल्ये
शिवेसर्वार्थसाधके शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते इतिश्लोकंसमधापठित्वा।
साष्टांगंपंचांगंवापंचवारंप्रणम्य ॐ विततस्वस्तिकमठमुष्टि योन्याख्याभिःपंचमुद्राभिः
प्रणमेत् पुनःसाष्टांगंप्रणम्य भूमौस्खलितपादानांभूमिरेवावलंबनम् त्वयिजातापरा
धानांत्वमेवशरणंशिवे अपराधोभवत्येवसेवकस्यपदेपदे कोपरःसहतेलोकेकेवलंस्वा
मिनंविना अपराधसहस्राणिक्रियंतेहर्निशंमया समर्द्धंसमिदंसर्वमितिमातःक्षमस्वमे
इतिबद्धांजलिप्रणतिपूर्वंक्षमाप्यार्घोदकंकेवलंपात्रांतरेणदायच ॐ इतःपूर्वंप्राणबुद्धिदेह
धर्माधिकारतोजाग्रत्स्वप्नसुषुप्त्यवस्थासुमनसावाचाकर्मणापद्भ्यामुदरेणशिश्नायत्स्मृ
तंयदुक्तं यत्कृतंतत्सर्वंरुद्रदेवसमर्पितमस्तुस्वाहा मामदीयंचसकलं श्रीमहात्रिपुरसुंद
रीसम्यगर्पये ॐतत्सत् इत्यनेनदेव्याअग्रेणार्विंदयोर्गृहीतोदकदानेनात्मानं समर्प्य

45

सर्वोक्तमूलसमग्रविद्यया केवलेन पुष्पेण मूलदेवीसमग्रया संपूज्य कृतांजलिः यद्दत्तं भक्तिमा
त्रेण पुष्पं पत्रं फलं जलं निवेदितं च नैवेद्यं तद्गृहाणानुकंपया आवाहनं न जानामि न जानामि
विसर्जनं पूजाभागं न जानामि त्वं गतिः परमेश्वरि कर्मणा मनसा वाचा नात्विवान्या गतिर्मम ॥
अंतश्चारेण भूतानां दृष्टा त्वं परमेश्वरि मातर्योनिसहस्रेषु येषु येषु व्रजाम्यहं तेषु तेष्वच्युता भक्ति
रच्युतेऽस्तु सदा त्वयि देवी दात्री च भोक्त्री च देवी सर्वमिदं जगत् देवी जयति सर्वत्र या देवी सोऽहमेव
हि यदक्षरपरिभ्रष्टं मात्राहीनं च येत् क्षंतुमर्हसि देवेशि कस्य न स्खलितं मनः नमस्ते देवदेवे
शि त्रिपुरे परमेश्वरि तव पादांबुजे नित्यं निश्चला भक्तिरस्तु मे इति क्षमाप्य सर्वयोनिमुद्रया प्र
णम्य शंखमुत्थाप्य देव्युपरि भ्रामयित्वा साधु वाऽसाधु वा कर्म यद्यदाचरितं मया तत्सर्वं कृपया
देवि गृहाणाराधनं मम इति देव्या दक्षहस्ते शंखजलं किंचिद्दत्वा शंखं स्वस्थाने संस्थाप्य तज्ज
लं किंचिद्वामहस्ते निधाय मूलेन सप्तधाभिमंत्र्य स्वात्मानं तेनाभ्युक्ष्य पुष्पांजलिमादाय ॥
ॐ रश्मिरूपा महादेव्याः अत्रष्टजितदेवताः श्रीसंदर्पगलीनास्ताः संतु सर्वशुभावहाः इति पु
ष्पांजलिं निक्षिप्य परिवारगणान् गणेशाद्यानंगदेवताद्वारदेवतासहितान् देव्या देहे विलीना
न्विभाव्य कामकलारूपमात्मानं ध्यात्वा देव्या सवर्णरूपमाधेयं तत्सर्वं निजदेहे विचिंत्य देवीरूप
मात्मानं ध्यायन् खेचरीमुद्रां बद्ध्वा तद्बीजेन देवीं प्रणम्य ऐं मूलं भगवति श्रीमहात्रिपुरसुंदरि त्वम

श्री·
४८
46

स्व इति नालत्रयेण देवीं प्रबोध्य तेजोमयीं विचिंत्य गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि ।
यत्र ब्रह्मादयो देवा न विदुः परमं पदम् इति तेजोरूपां तां संहारमुद्रया निर्माल्यपुष्पेण तेजः
सम्मूर्च्छयाघ्राय पूरकयोगेन सहस्रदलकमलं प्रापय्य तत्र क्षणं तेजोरूपां ध्यात्वा सुषुम्णा
मार्गेण ऐं हृदयाय नमः इति हृदयकमलमानीय तत्र यथोक्तरूपां ध्यायन् तिष्ठ तिष्ठ परे
स्थाने स्वस्थाने परमेश्वरि यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठंति मे हृदि इति हृदयकमले संस्थाप्य
तत्र यथोक्तसिंहासनमध्यगतश्रीचक्रमध्यगतां सपरिवारां परदेवतां मूलाधारे संस्थाप्य पे
शान्त्यां जलेन त्रिकोणवृत्तचतुरश्रमंडलं निर्माय तन्मध्ये शेषिकाख्यां निर्माल्यवासिनीं
तन्मंत्रेण षडंगन्यासेन सकलीकृत्य ॐ मातंगीं नवयावकार्द्रचरणां प्रोल्लासिहल्लांशुकां
वीणोल्लासिकरां समुन्नतकुचां मुक्ताप्रवालावलीं हृद्यांगीं सितशंखकुंडलधरां बिंबाध
रां सुस्मितां आकर्णालकवेणिमञ्जनघनां ध्यायेच्छुकश्यामलां इति जगन्मोहिनीं निर्मा
ल्यवासिनीं ध्यात्वा मूलदेव्या निर्माल्येन ततः उच्छिष्टभोजिनीं तां संपूज्य ऐं ऐं नमः उच्छिष्टचं
डालिमातंगिनि सर्ववशंकरि स्वाहा शेषिकाश्री इति निर्माल्यपुष्पैः संपूज्य तन्निर्माल्योद
कादिभिः पाद्यादिदीपांतान्युपचर्य नैवेद्यस्य शतांशं सहस्रांशं वा तच्चरणोदकेन निवेद्य नि
र्माल्यपुष्पांजलिमादाय लेह्यचोष्यान्नपानादितांबूलं स्रग्विलेपने निर्माल्यभोजने तव भ

ददामि श्रीशिवात्मया इति दत्वा तालत्रयपूर्वं प्रणिपत्य तां विसर्जयेदिति निर्माल्यवासिनीं सं
पूज्य तालत्रयपूर्वं देवनाथगुरो स्वामिन्देशिकस्वात्मनायक त्राहि त्राहि कृपासिंधो पूजां
पूर्णतरां कुरु इति श्रीगुरुं प्रार्थ्य श्रीपात्रं मस्तकांतमुद्धृत्य शिरःस्थाय गुरवे समर्प्य तत्पात्रं द
क्षकरे निधाय ऐं श्रीगुरुपादुकाविद्यांते श्रीस्वामिश्रीप्रतापकौलानंदनाथ श्रीपादुकां त
र्पयामि नमः इति त्रिः संतर्प्य तत्पात्रं स्वस्थाने संस्थाप्य तज्जलं किंचित्पात्रांतरे निधाय ऐं प्र
थमकूटं आत्मतत्वाय नमः ह्रीं द्वितीयकूटं विद्यातत्वाय नमः सौः तृतीयं शिवतत्वाय नमः
ऐं ह्रीं सौः समस्तमूलं सर्वतत्वाय नमः इति तत्र जले विन्यस्य तज्जलं पुनः पात्रांतरेणोद्धृत्य चुल
केनादाय त्रैलोक्यलेशं निक्षिप्य ऐं प्रकृतिबुद्ध्यहंकारमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पा
णिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवाय्वग्निसलिलपृथिव्यात्मकशुद्धचतुर्विंशति
तत्वसहितं अंशं २४ ऐं प्रथमकूटं आत्मतत्वात्मकस्थूलदेहं शोधयामि स्वाहा मायाविद्याक
लारागकालनियतिपुरुषात्मकशुद्धाशुद्धसप्ततत्वसहितं अंशं ३५ ह्रीं द्वितीयकूटं विद्यात
त्वात्मकं सूक्ष्मदेहं शोधयामि स्वाहा शिवशक्तिसदाशिवेश्वरशुद्धविद्यात्मकपंचतत्वात्मक
शुद्धतत्वसहितं यं रं ५ सौः तृतीयं शिवतत्वात्मकं परदेहं शोधयामि स्वाहा शिवशक्तिसदा
शिवेश्वरशुद्धविद्यामायाकलाविद्यारागकालनियतिपुरुषप्रकृत्यहंकारबुद्धिमनःश्रोत्रत्वक्

श्री॰ न्त्रजिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवाय्वग्निसलिलपृथिव्या
५० त्मकशुद्धमिश्राशुद्धषट्त्रिंशत्तत्त्वसहितं अं ५॰ ऐं ह्रीं सौः मूलं सर्वतत्त्वस्थूलसूक्ष्मपराख्यदे
हरूपाभिमानिनं जीवात्मानं शोधयामि स्वाहा इति चुलकचतुष्टयं स्वीकृत्य ततः पात्रं कराभ्यामा
दाय मूलं श्रीगुरुपादुकां विद्यां चोच्चार्य प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनी स्रुचं धर्माध
र्मकलास्नेहपूर्णं वह्नौ जुहोम्यहं स्वाहा इति तज्जलमश्नीयात् ततः कराभ्यां मूर्धादिपादांतं ष
ट्त्रिंशत्तत्त्वात्मकतां भावयन् स्वदेहं स्पृशेत् श्रीसंवर्तेनमः ॐ अद्भुतादेविवदेहं पात्रं वंदनमीश्व
रि तत्कालेयहरानंदपात्रं देवेशवंदितं पूजायां पात्रमानंदभरितं परमेश्वरि गुरुणा दत्तमभ्या
र्च्य प्रणमेच्छिरसा तदा श्रीमद्भैरवशेखरप्रविलसच्चंद्रामृतप्लावितं क्षेत्राधीश्वरयोगिनीगण
महासिद्धैः समाराधितं आनंदार्णवकं महात्मकमिदं साक्षात्त्रिखंडामृतं वंदे श्रीप्रथमं कराम्बु
जगतं पात्रं विशुद्धिप्रदं इत्यभिवंद्य वामहस्तेन पात्रमुत्तोल्य इदं ते पात्रं सनवित्तमिंद्र पिवः वा
ममेनाशतक्रतु पूर्णाहवो मदिरस्य मध्वायं विश्वायदभिहर्यंति देवाः इदं तां पात्रं संभृतममृ
तापरमामृतं पराहंतामये वह्नौ जुहोमि शिवरूपिणि अं आं १६ प्रकृतिबुद्ध्यादि चतुर्विंशति
तत्त्वसहितं आत्मतत्त्वेन स्थूलदेहं शोधयामि स्वाहा मूलं आत्मतत्त्वं शोधयामि स्वाहा इत्यु
च्चार्य जुहोमीति गुरुशक्तिसाधकेभ्य आज्ञां गृह्णीयात् तेच जुषस्व परमामृतमिति ब्रूयुः

ततः ओं ईं ज्वलति ज्योतिरहमस्मि ज्योतिर्ज्वलति ब्रह्माहमस्मि अहमस्मि ब्रह्माहमस्मि ।
योहमस्मि ब्रह्माहमस्मि सोहमस्मि ब्रह्माहमस्मि अहमेवाहं मां जुहोमि स्वाहा इदं पवित्र
ममृतं पिबामि भवभेषजं पशुपाशसमुच्छेदकारणं भैरवोदितं चित्ते स्वातंत्र्यसारत्वात्तस्माते
दमयन्नतः तन्मयत्वाद्भावानां भावाश्चांतर्हितारसे स्वस्वातंत्र्यविकासाय स्वरसः स्वेनपीय
ते तस्मादिमां स्तथारूपां पूर्णाहंतां पिबाम्यहं इति मंत्रात्पठित्वा मूलाधारादुत्थाप्य कुंडलिनी
मिष्टदेवतास्वरूपामाजिह्वांतं विभाव्य श्रीगुरुपादुकां स्मृत्वा शिवोहमिति भावयेत् हस्ताभ्यां
पात्रं धृत्वा मूलमंत्रमुच्चरन् कुलकुंडलिनीमुद्विज्जुयात् १ हेमं सिंधुरसावहं दयितया दत्तं
चपेयादिभिः किंचिद्वंचलरक्तपंकजदृशा सानंदमुद्वीक्षितं वामे स्वादुविमुद्रमुद्रिशाकले
पाणौ निधाय स्वके वंदे पात्रमहं द्वितीयमधुनानंदैकसंवर्द्धनं स्वात्ममूलत्रिकोणस्थे सूर्यको
टिसमप्रभे कुंडल्याकृतिचिद्रूपे जुहोतेद्रव्यं समंत्रकं विद्यातत्त्वं शोधयामि स्वाहा २ सर्वाम्नाय
कलाकलापकलितं कौलं हलोद्योततं चंद्रोपेंद्रमहेंद्रशंभुवरुणब्रह्मादिभिः सेवितं ध्या
तं देवगणैः परं मुनिगणैर्मोक्षार्थिभिः सर्वदा वंदे पात्रमहं तृतीयमधुना स्वात्मावबोधप्रदं मे
आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यम् भवावाजस्य संगथे शिवतत्त्वं शोधयामि स्वाहा ३
मत्स्यं मीनरसावहं हरिहरब्रह्मादिभिः सेवितं मुद्रामैथुनधर्मकर्मनिरतं तारान्वितं काश्र

श्री॰
४८

48

यं आचार्याष्टकसिद्धभैरवकुलाधीशेन संशोधितं पायात्पंचमकारतत्त्वसहितं पात्रं चतु
र्थं नमः शिवतत्त्वं शोधयामि स्वाहा ४ आधारे भुजगाधिराजवलये पात्रे मही मंडलं द्रव्यं
तत्तस्समुद्भवारि पिशितं चाष्टौ च दिग्दंतिनः सोऽहं भैरवमर्चयन्प्रतिदिनं तारागणैर्वृते
रादित्यादिसुरेंद्रसेवितमिदं पात्रं भजे पंचमं वियत्तत्त्वं शोधयामि स्वाहा ५ सच्छत्रामलभ
द्रपीठपरमानंदोदयाधायकं रम्यं राज्यकरं सदा सुखकरं साम्राज्यसाम्राज्यपदं नानाव्या
धिभवौघकारहरणं जन्मांतरध्वंसनं श्रीमद्भैरवभैरवीप्रियतरं पात्रं च षष्ठं नमः आत्मतत्त्वं
शोधयामि स्वाहा ६ जाग्रत्स्वप्नसुषुप्तितुर्यपरतः श्रेतत्प्रसादप्रदं विद्युद्भास्वरचंद्रजिह्व
यन्तु धांज्योतिषकलाव्यापितं येडापिंगलमध्यमात्रिवलयान्तस्थाः प्रबोधोद्धृतं पात्रं सप्तम
पूरणेतत्तरुणानंदप्रदं पात्रमं आत्मतत्त्वं शोधयामि स्वाहा ७ स्वच्छं श्रीगुरुपादुकांचति
लकं कंदेपि सारस्वतं शत्रोर्वा स्वबलशौर्यबुद्धिहरणं देहस्थितेः कारणं वांछासिद्धिकरं म
नःस्थितिकरं वश्यं जगद्योषितां पात्रं चाष्टममष्टसिद्धिकरणं प्रौढप्रसन्नं भजे वियत्तत्त्वं
शोधयामि स्वाहा ८ तीव्रानंदकरं सदाशिवपदं सर्वार्थसंपत्प्रदं साम्राज्यार्थकरं समस्त
सुखदं चाज्ञानविध्वंसनम् आयुष्कांतियशोविवर्धनकरं संसारमोहच्छिदं पात्रं लक्ष
गुणात्मकं च नवमं प्रौढप्रतापं भजे ९ शिवतत्त्वं शोधयामि स्वाहा ९ ब्रह्मविष्णुमहे।

गणानां देवानां च विशेषतः दुर्लभं पावनं पात्रं दशमं प्रणमाम्यहं १० पापघ्नं शान्तिशुभदं दिव्यं स्वा
नुभवालयं पात्रमेकादशं वंदे गुरुसेवासुखागतं ११ अथ पात्रप्रशंसा पात्रं हृत्वा करे मंत्री सर्व
कर्मलभेत्सुधी इहलोके सुखं भुक्त्वा देहान्ते भैरवो भवेत् १२ करे पात्रं सुखं स्तोत्रमानंदो हृद
ये गुरुः भक्तिर्गुरुपदांभोजे स्मरणं किमतः परम् १३ एकेन शुष्कवटुकेन घटं पिबामि वा पी
पिबामि सहसा लवणार्द्रकेन आस्वाद्य मांसमलिरोहितमंडखंडं गंगां पिबामि यमुनां सहसा
गरेण १४ करे मालां सुखं हालां वामे रामां सुकोमलां हृदये त्रिपुरां बालां यागशालां गृहे गृ
हे १५ पात्रं भैरवपात्रं गोत्रं श्रीनाथपादुका गोत्रं शास्त्रं संविद्धास्त्रं ज्ञानं तत्त्वावबोधकं ज्ञानं १६
अलिपिशितपरं श्रीभोगपूजापरोऽहं वज्रविधकुलमार्गारंभसंभावितोऽहं पशुजनविमु
खोऽहं भैरवीमाश्रितोऽहं गुरुचरणरतोऽहं भैरवोऽहं शिवोऽहं १७ वामे रामा रमणकुशला दक्षिणे
चालिपात्रमग्रे मुद्राचरणकवटुकाः स्फुरद्रसोल्लासशुद्धिः स्कंदे वीणा सरसकविता सद्गुरोः
सत्कथायां कौलो मार्गः परमगहनो योगिनामप्यगम्यः १८ वामे चंद्रमुखी मुखे च मदिरा
पात्रं करांभोरुहे मूर्ध्नि श्रीगुरुचिंतनं भगवतीध्यानास्पदं मानसं जिह्वाग्रे जपसाधनं परि
णतिः कौलक्रमाभ्यासने ये संतो निपतंति पिबंति सुरसं ते भुक्तिमुक्तिं गताः १९ पीत्वा पीत्वा
पुनः पीत्वा यावत्पतति भूतले उत्थाय च पुनः पीत्वा भूयो जन्म न विद्यते २० धर्माधर्महवि

श्री·
५९
49

दीप्ते स्वात्माग्नौ मनसा स्रुचा सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहा २१ प्रकाशा
काशहस्ताभ्यामवलंब्योन्मनीस्रुचं धर्माधर्मकलास्नेहपूर्णां वह्नौ जुहोम्यहं स्वाहा २२ या
वत्त्वचलते दृष्टिर्यावत्त्वचलते मनः तावत्पानं प्रकर्तव्यं पशुपानमतः परम् २३ इत्थं पात्रहू
जनं समाप्य ततः स्वस्वाम्नायिकान्यथासंप्रगुरूपदेशविधिना संपूज्य संतर्प्य पूर्वस्थापितबलि
पात्रस्थमन्नादिकमेकस्मिन्पात्रे कृत्वा तद्गृहीत्वोत्थाय सोदकपात्रहस्तः वहिर्गत्वा जलेना
शुचौ चतुरश्रहस्त त्रिकोणात्मकं मंडलं कृत्वा तत्र गदादिडमरुपात्रहस्तं त्रिलोचनं कृष्णाभं
भैरवं ध्यायेत्सर्वविघ्नविनाशनं इत्युच्छिष्टभैरवं ध्यात्वा गंधादिना संपूज्य ४ उच्छिष्टभैरवाय
एहि बलिं गृह्ण गृह्ण हुं फट् स्वाहा इति पात्रस्थं बलिद्रव्यं तत्र मंडले विसृज्य तत्पात्रे हस्तौ
पादौ प्रक्षाल्याचम्य तत्पात्रं जलेनापूर्य पूजागृहद्वारं गत्वा उदयोस्तु ध्रुवत्वं ततः प्रविश्य स्वा
सने समुपविश्य तत्पात्रस्थजले विशेषार्घ्यजलबिंदुं दत्त्वा तेन जलेन स्वात्मानमभिषिंचन्
शांतिस्तोत्रं पठेत् श्रीगुरवे शिवाय नमः ओं नश्यंतु प्रेतकूष्मांडा नश्यंतु दूषका नराः साध
काना शिवाः संतु आम्नायपरिपालिनः जयंतु मातरः सर्वा जयंतु योगिनीगणाः जयंतु सि
द्धा डाकिन्यो जयंतु गुरुपंक्तयः नंदंतु अणिमासिद्धा नंदंतु भैरवादयः नंदंतु देवताः सर्वाः सिद्ध
विद्याधरादयः ये चाम्नायविशुद्धाश्च मंत्रिणः शुद्धबुद्धयः सर्वदानंदहृदया नंदंतु मम भक्ति

तः नक्षत्राणि ग्रहा योगाः करणानि तथापरे सर्वे ते सुखिनो यांतु सर्वानद्यश्च पक्षिणः पशवस्तर
वश्चैव पर्वताः कंदरागुहाः ऋषयो ब्राह्मणाः सर्वे शांतिं कुर्वंतु मे सदा तीर्थानि पशवो गावो ये चा
न्ये उपभ्रमयः हृष्टाः पतिव्रता नार्यः शिवं कुर्वंतु मे सदा शिवं सर्वत्र मे चास्तु पुत्रदारधनादि
षु राजानः सुखिनः संतु क्षेममार्गोस्तु मे सदा शुभा मे दिवसाः यांतु मित्राणि संतु मे शिवाः ॥
साधकाजयिनः संतु शिवालिष्टं तु पूजकाः संपूजकानां प्रतिपालकानां यतींद्रयोगींद्रतपो
धनानां देशस्य राष्ट्रस्य कुलस्य नित्यं करोतु शांतिं भगवान्कुलेशः ये ये चापथियः स्वभूषणार
ताः सन्निंदकाः पूजने देवाचारविसर्गनष्टस्य दयाद्दुष्टाश्च ये वाधकाः दृष्टाश्च क्रमपूर्वजातस्य
दयाये कौलिकद्वेषकास्ते ते यांतु विनाशमत्र समये श्रीभैरवस्याज्ञया द्वेष्टारः साधकानां च स
देवाम्नायदूषकाः डाकिनीनां मुखे यांतु सर्वास्ता पिशितैः स्तुताः शत्रवो नाशमायांतु मम निंदा
कराश्च ये द्वेष्टारः साधकानां च विनश्यंतु शिवाज्ञया ये निंदकास्ते विलयं प्रयांतु ये साधका।
स्ते प्रभवंतु सिद्धाः सर्वत्र देवी करुणावलोकाः पुरः परे शीमम सन्निधत्तां इति शांतिस्तोत्रं प
ठित्वा अथान्यप्रकारेण शांतिस्तोत्रं लिख्यते श्रीभैरवः ॐ देवि वक्ष्यामि प्रज्ञां मे शांतिस्तोत्र
मनुत्तमं वीराये न पराः नंदपदं प्राप्स्यंत्यनामयं योगिनीचक्रमध्यस्थं मातृमंडलवेष्टितं नमा।
मि शिरसा नाथं भैरवं भैरवीप्रियं अनादिघोरसंसारव्याधिध्वंसैकहेतवे नमः श्रीनाथदेवाय।

श्री· ५·

50

यकुलौषधिप्रदायिने आपदोद्धरिते रोगाः समयाचारलंघनात् येसर्वे ज्ञव्यपोहंतु दिव्यचा
क्रस्यमेलनात् आयुरारोग्यमैश्वर्यं कीर्तिर्लाभः सुखं जयः कांतिर्मनोरथश्चास्तु पांतु सर्वा
श्च देवताः नंदंतु साधककुलान्वयदर्शका ये स्पष्टाध्ययनाभ्यां च तत्क्रममहान्वया ये नंदंतु स
र्वकुलकौलरताः परे ये ऽन्ये विशेषपदभेदकशांभवाद्ये नंदंतु सिद्धगुरवः स्वगुरुक्रमो
द्या ज्येष्ठास्तु गाः समयिनो वटुकाकुमार्यः षड्योगिनीप्रवरवीरकुलप्रसूता नंदंतु भूमि
पतयो द्विजसाधुलोकाः नंदंतु नीतिनिपुणा निरवद्यनिष्ठा निर्मत्सरा निरुपमा निरुपद्र
वाश्च नित्या निरंजनरता गुरवो निरीहाः शाक्ताश्च शांतमनसो ऽस्तु न शोकशंकाः नंदंतु यो
गनिरताः कुलयोगयुक्ता आचार्यसामयिकसाधकपुत्रकाश्च गावो द्विजाः युवतयो यतयः
कुमार्यो धर्मे भवंतु निरता गुरुभक्तियुक्ताः नंदंतु साधककुलाश्च शिवमादिनिष्ठाः शापाः प
तंतु समयद्विषि योगिनीनां साशां भवीस्फुरतु कापि ममाद्य वस्थाय स्यांघ्रिरोश्चरणपंकज
मेव लभ्यं याश्च क्रक्रमभूमिकावसतयो नाडीषु याः संस्थिताः याः कायद्रुमरोमकूपनिल
याः याः संस्थिता धातुषु उच्छ्वासोर्मिमरुत्तरंगलिगया निःश्वासवासाश्च या स्ता देव्यो रिपु
भक्ष्यभक्षणपराः तृप्यंतु कौलार्चिताः या दिव्यक्रमपालिकाः क्षितिगता या देवतास्तोय
गा या नित्यं प्रथितप्रभा शिखिगता या मातरिश्वाश्रयाः या व्योमामृतमंडलामृतमया

याः सर्वगाः सर्वदास्ताः सर्वाः कुलमार्गपालनपराः शांतिं प्रयच्छंतु मे ऊर्ध्वं ब्रह्मांडतो वा दिवि
गगनतले भूतले निस्तले वा पाताले वानले वा सलिलपवनयोर्यत्र कुत्र स्थिता वा क्षेत्रपीठो
पपीठादिषु च कृतपदा धूपदीपादिकेन प्रीता देव्यः सदा नः शुभबलिविधिना पांतु वीरेंद्रवं
द्याः ब्रह्मश्रीशेशरुद्रग्रहवटुकगणाभैरवाः क्षेत्रपालावेतालादिस्कंदग्रहवस्तमन्त्रसि
द्धाप्सरोगुह्यकाद्याः भूतागंधर्वविद्याधरऋषिपितृयक्षनागादिप्रभूता योगीशाश्चारणाः
किंपुरुषमनिबराश्चक्रगाः पांतु सर्वे देहस्याखिलदेवतागजमुखाः क्षेत्राधिपा भैरवाः ।
योगिन्यो वटुकाश्च यक्षपितरो भूताः पिशाचा ग्रहाः अन्ये भूचर दिक्चराश्च खचरा वेताल
काश्चेटकास्तृप्ताः स्युः कुलपुत्रकस्य पिवतः श्रीवीरसंतर्पणात् सत्पंचेन्द्रकृवाक्यमेवपि
त्रदेवाः शेषवयोगिनी प्रीतिश्चेत्परदेवता च यदि चेद्वेदः प्रमाणं च चेत् शाक्तेयं यदि दर्शनं भ
वति चेदाजेयमेषास्ति चेत्संपत्त्रापि च कौलिकाश्च यदि चेत्स्यान्मे जयः सर्वदा तृप्यंतु मात
रः सर्वाः समुद्राः सगणाधिपाः योगिन्यः क्षेत्रपालाश्च मम देहे व्यवस्थिताः शिवाद्यवनिप
र्यंतं ब्रह्मादिस्तंभसंयुतं कालाग्न्यादिशिवांतं च जगद्यज्ञेन तृप्यतु पठित्वेदं नमेद्धीमान्वी
रवंदनमाचरेत् स्त्वेवद्धीमान्नमेद्धीमान्मंत्रसिद्धिः प्रजायते इत्यं शांतिस्तोत्रं पठित्वा वीरवंदन
स्तोत्रं पठेत् ॐ जगत्त्रयाभ्यर्चितशासनेभ्यः परार्थसंपादनकोविदेभ्यः समस्तकृतक्लेशाम।

श्री· ह्येरगेभ्योनमोनमः साधकनाथकेभ्यः प्रहीनसर्वाश्रयवासनेभ्यः सर्वार्थतत्त्वोदितसा
५१ धनेभ्यः सर्वप्रजाभ्युद्धरणोदितेभ्योनमोनमः साधक· निस्तीर्णसंसारमहार्णवेभ्यस्त
51 स्मालतोन्मूलनतत्परेभ्यः जराहजामृत्युनिवारकेभ्योनमोनमः सद्धर्मरत्नाकरभा
जनेभ्योनिर्वाणमार्गोत्तमदेशिकेभ्यः सर्वत्रसंपूर्णमनोरथेभ्योनमोनमः लोकान्तके
पाभ्युदितादरेभ्यः कारुण्यमैत्रीपरिभाविनेभ्यः सर्वार्थचर्यापरिपूरकेभ्योनमोनमः
विध्वस्तनिःशेषकुवासनेभ्योज्ञानाग्निनादग्धमलेंधनेभ्यः प्रज्ञाप्रतिज्ञापरिपूरके
भ्योनमोनमः सर्वार्थिताशापरिपूरकेभ्योविनेयपद्माकरबोधकेभ्यः विस्तीर्णसर्वा
यगुणाकरेभ्योनमः अनंतकर्मार्जितशासनेभ्योब्रह्मेंद्ररुद्रादिनमस्कृतेभ्यः परस्प
रान्तग्रहहकारकेभ्योनमोनमः विभग्नभूतादिमहाभयेभ्योमपंचकाचारपरायणेभ्य·
समस्तसौभाग्यकलाकरेभ्योनमोनमः विभग्नदुष्कर्मजवासनेभ्यः समंततोजुष्टम
हाशयेभ्यः लभ्यामलज्ञानकृतास्पदेभ्योनमोनमः शांभविशांभवेभ्यः सर्वागमांभो।
धिमहाप्लवेभ्यः श्रीचक्रपूजार्थपरायणेभ्यः श्रीवीरचर्याचरणोत्तमेभ्योनमोनमः शां
भविशांभवेभ्यः श्रीमंत्रकोटिद्युतिभूषणेभ्योह्यविंशत्कुलासदशातिगेभ्यः अद्वैतत
त्त्वामृतभाजनेभ्योनमः शांभविशांभवेभ्यः षट्त्रिंशतालक्षणमम्बुषितेभ्यः प्रोत्फुल्लर

त्नाकरलोचनेभ्यः प्रतप्तचामीकरविग्रहेभ्यो नमो नमः शांभवि शांभवेभ्यः संबोधसंसारसंस्थि
तेभ्यः संसारनिर्वाणनिदर्शनेभ्यः महाकृपावेष्टितमानसेभ्यो नमो नमः शांभवि शांभवेभ्यः परैक
विज्ञानरसाकुलेभ्यो वामाश्रिताचारभयानकेभ्यः स्वातंत्र्यविध्वस्तजगत्तमोभ्यो नमो नमः शां
भवि शांभवेभ्यः श्मशानचर्यासमहाफलेभ्यो मोहांधकारापहृतिक्षमेभ्यः परस्पराज्ञापरिपा
लकेभ्यो नमो नमः शांभवि· विधूतकेशालिकपालिकेभ्यः सुरासवारक्तविलोचनेभ्यः नवी
नकांतारततत्परेभ्यो नमो नमः शांभवि शांभवेभ्यः विभूतिलिप्तांगदिगंबरेभ्य श्रिताधिभूमा
लिभयानकेभ्यः कपालपात्रामृतपानकेभ्यो नमो नमः भैरवि भैरवेभ्यः सिद्धाष्टकादानमहा
मृतिभ्यः श्रीभैरवाचाररहस्यदेभ्यः स्वाधीनतान्यकृततनिर्जरेभ्यो नमो नमः भैरवि भैरवे·
भ्यः प्रशांतशास्त्रार्थविचारकेभ्यो निर्हेतनानारसकाम्यकेभ्यः निरस्तनिःशेषविकल्पनेभ्यो
नमो नमः भैरवि भैरवेभ्यः स्वात्मैकभावांतरितापायेभ्यः साधुज्यसामान्यसुखावाकेभ्यः।
श्रीसच्चिदानंदितविग्रहेभ्यो नमो नमः भै· परप्रसादास्पदमानसेभ्यो ब्रह्माद्वयज्ञानरसाकु
लेभ्यः शिवोऽहमित्याश्रितचेतनेभ्यो नमो नमो भैरवि भैरवेभ्यः सर्वथा सर्वदा सार्वं सर्वं घट
पटादिमत् जगज्जनितविस्तारं ब्रह्मेदमिति वेद्म्यहं अहमेव परोहंसः शिवः परमकारणं।
मत्प्राणे सत्त्वपम्यात्मालीनः समरसीगतः सच्चिदानंदनिलयं परापरमकारणं शिवाद्वय

श्री·
५२

प्रकाशाढ्यं शरणमलं धामधीमहि अनेनवीरस्तवकीर्तनेन सम्यक्कृतेनाङ्के प्राप्तवासनोहं सं
सारकांतारमहार्णवेस्मिन्निमज्जमानं जगदुद्धरेयम् ॥ इति शांतिस्तोत्रं वीरवंदनाख्यं स्तोत्रं
च पठित्वा । सर्वान्सामयिकानभिषिंच्य विशेषार्घ्यपात्रमुद्धृत्य शिरःस्थाय श्रीगुरवे प्रभव
त्समर्प्य तच्छेषं तत्पादुकां त्रिः समभ्यर्च्य मूलविद्या श्रीगुरुपादुकाविद्यां तेच स्वाहा । इति
मूलाधारकुंडलिन्यात्मक श्रीपरदेवतायां वह्निवद्बुद्ध्या तज्जलं पात्रांतरे कृत्वा श्रीपा
त् शेषं प्रियशिष्याय प्रसादबुद्ध्या किंचिद्दद्यात् सोपि स्वपात्रे कृत्वा तज्जलं प्राश्नीयादि
त्यर्घ्यप्रतिपत्तिः ततः स्वगुरूपदिष्टविधिनाशेषकृत्यं निर्वर्त्य समापयेत् ततस्ताम्रादि
पात्रे गंधपुष्पाक्षतान्वितेन जलमादाय ॐ नमो विवस्वते ब्रह्मन्भास्वते विष्णुतेजसे ॥
नमः सर्वजगच्चक्षुषे सवित्रे कर्मदायिने ह्रां ह्रीं हंसः सूर्यप्रपन्नेभ्यः स्वाहा इति सूर्यायार्घ्यं द
त्वा कृतांजलिः यच्छिद्रं तपच्छिद्रं यच्छिद्रं पूजने मम सर्वं तदच्छिद्रमस्तु भास्करस्य
प्रसादतः इत्यच्छिद्रमवधारयेत् ततो मूलेन प्राणायामत्रयं ऋष्यादिकरषडंगन्यासान्वि
धाय षडासनवाग्देवताष्टकन्यासान्विधाय प्रागुक्तं श्रीगुरुस्तोत्रं पठित्वा श्रीगुरुं प्र
णम्य मूलविद्यया द्वितीयखंडेन निर्माल्यं शिरसि धृत्वा मूलविद्ययैव चरणोदकं स्वी
कृत्य श्रीपरदेवताभक्तेभ्यो नैवेद्यादिकं विभज्य दत्वा स्वयमपि सुहृद्बांधवजनैः सार्धं

भुक्त्वा स्वात्मानं कामकलारूपं विभावयन् सुखं विहरेत् एवं बिंदुचक्रमारभ्य चतुरस्रांतं
वा पूजयेत् यथा सृष्टिसंहारपूजा इति विस्ताराति विस्तराभ्यां पद्धतित्रयमित्थं नित्यक्रमेण पू
जयितुः सर्वसिद्धिः स्यात् अमंगलमपि मंगलं स्यात् विस्तारा शक्तौ संक्षेपतो नित्यपूजां कु
र्वीत तत्र शुचिर्भूत्वा शुद्धासनेउपविश्य श्रीगुर्वादिवंदनपूर्वकं भूतशुद्धिं मातृकान्यासं यो
गपीठन्यासं प्राणायामं करशुद्ध्यादिकरषडंगन्यासं करशुद्धिषडासनषडंगयुवतीवाग्देव
ताष्टकचतुष्पीठन्यासादिकं च कृत्वा अत्राप्यशक्तौ प्राणायामं करशुद्ध्यादिकरषडंगचतु
रासनवाग्देवताष्टकात्मकं न्यासत्रयं वा कृत्वा संक्षेपतः सामान्यार्घ्यश्रीपात्रं च स्थापयि
त्वा आत्मपूजां विधाय पीठपूजां कृत्वा श्रीचक्रे पूर्ववन्मूलदेवीमावाह्य षोडशभिर्दश
भिः पंचभिरुपचारैर्वा पूजयित्वा यथाशक्ति प्राग्वन्नित्यामंडलादिषडंगयुतं संपूज्य नवा
वरणदेवताः पूजयेत् अशक्तौ चतुरस्रमारभ्य बिंदुचक्रांतमावरणनवकं पूजयेत् ततो
यथाविधि पूजाशेषं समापयेदित्यल्पकल्पः तत्राप्यशक्तावष्टारमारभ्य बिंदुचक्रांतमाव
रणत्रयं पूजयित्वा शेषं समापयेदित्यल्पात्कल्पः तत्राप्यशक्तौ षडंगयुवतीपूजांते त्रिको
बिंदुचक्रं यथाविधि पूजयेदिति परमाल्पकल्पः प्रवासे पथि दुर्गमे स्थाने परचक्राद्याग
मे सिंहचौराद्युपद्रवे कारागृहप्रायोपवेशनादिसंभवे मनोभये जाते स्थानपूजनासक्ता

श्री॰ यल्लाभेचासनादिकंनिर्वर्त्य न्यासादिकमपियथाशक्तिविधाय यथाविधिध्यात्वावा
५३ ह्य पूजाविधिनैवार्घ्यसाधनपीठपूजापुरःसरंमानसीमेव श्रीचक्रपूजांयथाशक्तिवि
53 धाय जपहोमादिकमपि यथाशक्तिकृत्वासमापयेदितिमानसपूजासमयोविधिश्च
इतिसंक्षेपपूजाविधिः ॥ महामाहेश्वराचार्यैःसाहिब्कौलाभिधाश्रमे अवतीर्णैःस
मालोक्यभूरितंत्राणिशक्तितः नाविस्तारातिविस्तारासैषापद्धतिरर्थितैः अन्यथा
स्यजनैःश्रीमच्छ्रीविद्यायाविनिर्मिता ॥ इतिश्रीमहामाहेश्वराचार्यवर्यश्रीमच्छ्री
साहिब्कौलानंदनाथपादुकाविरचितश्रीविद्यानित्यपूजापद्धतिः संपूर्णा समाप्ते
तिभद्रदाभवतुसदासाधकलोकसङ्घानाम् श्रीगुरवेशिवायेनमः ॥: